January 2023 Volume - X Issue I

Research Journal

ISSN No. 2277-7067

Journal of Fundamental & Comparative Research

शोधसंहिता

A Peer reviewed Bi-annual Interdisciplinary Research Journal of the University

UGC CARE Listed Journal

- Chief Editor -

Prof. Hareram Tripathi

Hon'ble Vice Chancellor

- Editors -

Prof. Madhusudan Penna

Director, Research and Publication

Dr. Renuka Bokare

Public Relations Officer

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY

RAMTEK

A Bi-annual Interdisciplinary Research Journal of KKSU

Peer Reviewed Journal of Fundamental & Comparative Research

शोधसंहिता

ISSN No. 2277-7067

Volume - X Issue I (January 2023)

UGC CARE Listed Journal

Chief Editor : **Prof. Hareram Tripathi**
Hon'ble Vice Chancellor

Editors : **Prof. Madhusudan Penna**
Director, Research and Publication

Dr. Renuka Bokare
Public Relations Officer

Editorial Board :

Prof. K.K. Pandey
Prof. Lalita Chandratre
Prof. Kavita Holey
Prof. Harekrushna Agasti
Dr. Deepak Kapade

Peer Review Committee :

Dr. Dinakar Marathe, Ratnagiri
Dr. Dinesh Rasal, Pune
Prof. K. Nilkantham, Hydrabad
Prof. Kala Acharya, Mumbai
Dr. Madhav Ashtikar, Nagpur
Dr. Manjiri Bhalerao, Pune
Dr. Padmanabh Marathe, Mangaluru
Prof. JSR Prasad, Hydrabad
Prof. Harekrushna Agasti, Ramtek
Prof. Nanda Puri, Ramtek

Published by : Registrar, KKSU, Ramtek

© KKSU, Ramtek

राष्ट्रहिताय संस्कृतम्

KAVIKULAGURU KALIDAS SANSKRIT UNIVERSITY
RAMTEK

From Editor's Desk

Dear Sanskrit lovers!

Welcome to this issue of Shodhasamhita, the UGC care listed journal of KKSU. May the energy responsible for knowledge and wisdom inspire us all in the study of our traditions in modern context and help the mankind reach excellence in the pursuit of knowledge!

Shodhasamhita is a research Journal. Research is primarily to bring out some unknown or less known facts useful to the society. Beating around the bush, redundancy and such rubbish should be sincerely avoided in research.

Sanskrit studies, under the new name of Indian Knowledge Systems, gained the attention of the elite and new research is being encouraged by Higher Education Institutions in India.

India had been the fertile land of several sciences and technologies in ancient and medieval period. A faithful study of our past can throw light on many hidden aspects of our history and legacy. The greedy invasions by foreign people had destroyed much of our intellectual development forcing us to believe that all science and technology came from other lands into India. An age of resurgence always occurs in history.

The National Education Policy-2020 lays emphasis on revisiting the Indian Knowledge Systems, especially, the sciences and technology of this land for finding solutions to many contemporary issues. Dedicated and honest research is much required in the fields of mathematics, astronomy, consciousness studies, manuscripts, archeology, inscriptional studies, physical sciences, health sciences, humanities and others.

We all should note that it is our collective responsibility to present quality research only to the society. If any other motive comes in, like promotion etc., research quality gets compromised and we will become laughing stock before others.

Shodha samhita encourages sincere research based on original sources from Sanskrit, Pali, Prakrit texts. Innovative and relevant research finds first place in shodha samhita.

It has come to our notice that some antisocial elements are exploiting the resources and circulating duplicate and forged Shodha samhita, thus cheating the researchers. My sincere appeal to all researchers is that they should approach the university on the mail and phone number available on our website only and pay the required fees on getting official instruction only. A police complaint has been lodged against such miscreants who are cheating the researchers.

May we collectively contribute to a better society!

Prof. Penna Madhusudan

Content

Sr. No.	Title	Pg. No.
1	**काव्यप्रकाशे पञ्चमतो दशमोल्लासं यावदुद्धृतानां** डॉ.राधावल्लभशर्मा	1
2	**श्रीशाण्डिल्येनाथर्वणात्प्राप्तब्रह्मविद्या** केशवकुमारः मन्था, प्रो. कलापिनी अगस्ती	17
3	**पाणिनीयनये अपादानतत्त्वविमर्शः** डॉ. अभिमन्यु कुमार	30
4	**कर्मणा यमभिप्रैति स सम्प्रदानम्** जयवन्त चौधरी	38
5	**वर्तमानसमाजे प्राचीनधर्मशास्त्रनिरूपितदायभागस्य प्रासङ्गिकत्वम्** ड. अञ्जनदासः	43
6	**भारतीयपरम्परादिशा दाम्पत्यविच्छेदपरिहारोपायाः** चव्हाण-अविनाशः	50
7	**कीर्तननृत्यम् – वैष्णवीयप्रीतलाभस्यैका दिक्** अमल कुमार कर	63
8	**समानकर्तृकयोः पूर्वकाले सूत्रविचार (भाष्यकार एवं टीकाकारों की दृष्टि में)** डॉ. ललित प्रधान	71
9	**कौटिलीय अर्थशास्त्र में नगररचनाविचार तथा स्मार्ट सिटी संकल्पना** डॉ रेणुका बोकारे	78

10	**आयुर्वेद सूत्रम् ह्या ग्रंथातील आहाराविषयक विचारांचे अध्ययन** विद्या लांजेवार, प्रो. कलापिनी अगस्ती	93
11	**Dhruva Giti-s: A musical composition in Sanskrit Drama** Dr.Geetha H	101
12	**Finding Meanings in Ted Hughes "Thrushes" through Sabdasaktyubdbhava & Arthasaktyaudbhava Dhwani** Priyamvada C, Maitali Khanna, M Praphulla	108
13	**Śrīdhara's concept of Bhakti: A study of Subodhinī commentary on Bhaktiyoga chapter of Bhagavadgītā** Swati Phadke, Dr. Shakuntala Gawade	118
14	**Vriddhagargya samhita on vastuvidya** Prof. R.N.Iyengar, Warija Adiga	131
15	**Effect of Functional Organisational Climate on Managerial Effectiveness in IT Sector as per Ancient Indian Texts** R. KHERDE, D. CHRISTIAN & Prof. K. HOLEY	154

काव्यप्रकाशे पञ्चमतो दशमोल्लासं यावदुद्धृतानां प्राकृतपद्यानां लोकोत्तरवर्णनपरिस्फुरत्ता

डॉ.राधावल्लभशर्मा

अवगतसर्वशास्त्रहृदयोऽनुपमपण्डितो राजानकमम्मटाचार्यः काव्यप्रकाशाख्यं ग्रन्थरत्नं जग्रन्थ इति सर्वविदितोऽयं प्रसङ्गः। ग्रन्थरत्नेऽस्मिन् काव्यशास्त्रीयसिद्धान्तान् विषयांश्च समन्वयात्मिकया सरलया च शैल्या प्रत्याख्याय साहित्यविद्याधुरिणोनेनविदुषा किमप्यपूर्वं कविकर्म प्राकाशि। सिद्धान्तानाममीषामुदाहरणत्वेन प्रायः प्राकृतभाषा सुष्टुतया समाश्रिता सरस्वतीसूनुनानेनेति भाषास्नेहोऽत्र संलक्ष्यते। भाषाया अस्यामहत्त्वमुररीकृत्य वाक्पतिराजो गउडवहोनामधेयेग्रन्थे इदं बभाषे -

णवमत्थ दंसणं संनिवेससिसिराओ बंधरिद्दीओ।
अविरलमिणमो आभुवनबंधमिह णबर पअम्मि॥[1]

इत्थमेव महेश्वरसूरिणाप्यवादि—

गूढत्थदेसिरहिअं सुललिअवण्णेहिं विरइअं रम्मं।
पाइयकब्बं लोए कस्स ण हिअअं सुहावेइ॥[2]

सस्कृतसरस्वत्याः सौभाग्यसीमानः एतादृशा महाकवयोऽपि प्राकृतस्याग्रे संस्कृतं गौणीकुर्वन्ति। तद्यथा—

परुसा सक्कअबन्धा पाउअबन्धो वि होइ सुउमारो।
पुरसमहिलाणँ जेत्तिअमिहन्तरं तेत्तियमिमाणम्॥[3]
ललिए महुरकखरए जुवईजणवल्लहे ससिंगारे।
सन्ते पाइअव्वे को सक्कइ सक्कअं पठिउम्।[4]

इत्थमिह प्रकाशे समुदाहृतानां प्राकृतपद्यानामनतिरसाधारणं वैशिष्ठ्यं विस्तरेण तावद्वर्ण्यते। पञ्चमोल्लासे असुन्दरगुणीभूतव्यङ्ग्यस्योदाहरणं यथा—

वाणीरकुडंगुड्डीणसउणिकोलाहलं सुणन्तीए।
घरकम्मवावडाए बहुए सीअन्ति अंगाइं॥[5]

गृहपार्श्ववर्तिवेतसनिकुञ्ज े दत्तसङ्केताया निकुञ्जोड्डीनपक्षिकोलाहलतर्कितनायकप्रवेशाया गुरुजन-पारतन्त्र्येण गृहकर्माणि रन्धनादौ व्यावृताया अवस्थावर्णनमिदम् ।

अत्र दत्तसङ्केतचौर्यकामुकरतसमुचितस्थानप्राप्तिर्ध्वन्यमाना वाच्यमेवोपस्कुरुते । तथा हि गृहकमर्व्यापृताया इत्यन्यपराया अपि, वध्वा इति सातिशयलज्जा पारन्त्र्यबद्धाया अपि, अङ्गानीत्येकमपि न तादृगङ्गं यद्गाम्भीर्यावहित्थवशेन संवरीतु ं पारितम् । सीदन्तीत्यास्तां गृहकर्मसम्पादन ंस्वात्मनमपि धतु ंन प्रभवन्तीति । गृहकर्मयेगेन स्फुटं तथा लक्ष्यमाणानीति । अस्मादेव वाच्यात्सातिशयमदनपरव-शताप्रतीतेश्चारुत्वसम्पत्तिरिति । वस्तुतः सीदन्तीति वतर्म ।ननिर्देशादवसादस्याविरामः सूच्यते । तथा श्रवणसमकालं तत्कायर्स्यावसादस्यकथनरूपातिशयोक्त्या उत्कण्ठातिशयो व्यज्यते । अत्राङ्गानि सीदन्तीति वाच्यादत्तसंके्तो लतागहन ंप्रविष्ट इति व्यङ्ग्यमस्फुटम् ।

वाच्यव्यङ्ग्ययोः विषमभेद्स्योदाहरण ंयथा–

कस्य वा ण होइ रोसो दट्ठूण पिआइ सव्वणं अहरं ।

सभरपडमग्धाइणि वारिअवामे सहसु एण्हिं ॥[6]

परपुरुषखण्डिताधरतया कुपित े प्रोष्यागत े पत्यौ सख्या निरपराधत्वबोधनाय प्रतारणोक्ति-रियम् । अत्र वाच्यार्थबोधस्य विषयो नायिका व्यङ्ग्यार्थस्य च विषयो नायको वर्तते । अत्रायमभिप्रायः– काचिदविनीता कुतश्चित्खण्डिताधरा निश्चिततत्सविधसंनिधान े तद्भर्तरि तमनवलोकमानयेव कयाचिद्विदग्धसख्या तद्वाच्यतापरिहारायैवमुच्यते । सहस्वेदानीमिति वाच्यमविनयवतीविषयम् । भर्तृविषय ंतु– अपराधो नास्तीत्यवेद्य मान ं व्यङ्ग्यम् । सहस्वेत्यपि च तद्विषय ंव्यङ्ग्यम् । तस्यां च प्रियतेमनगाढमुपालभ्यमानायां तद्व्यलीकशङ्कितप्रतिवेशिकलोकविषय ं चाविनयप्रच्छादनेन प्रत्यायन ं व्यङ्ग्यम् । तत्सपत्न्यां च तदुपालम्भतदविनयप्रहृष्टायां सौभाग्यातिशयख्यापन ं प्रियाया इति शब्दबलादिति सपत्नीविषय ं व्यङ्ग्यम् । सपत्नीमध्य े इयता खलीकृतास्मीति लाघवमात्मनि ग्रहीतु ंन युक्तं, प्रत्युताय ंबहुमानः, सहस्व शोभस्वाद्मीमिति सखीविषय ं सौभाग्यप्रख्यापन ंव्यङ्ग्यम् । अद्येय ंतव प्रच्छन्नानुरा-गिणी हृदयवल्लभत्थं रक्षिता पुनः प्रकटरदनदंशनविधिन ं विधेय इति तच्चौर्यकामुकविषयसम्बोधन ं व्यङ्ग्यम् । इत्थं

मयैतदपह्नुतमिति स्ववैदग्ध्यख्यापन ंतटस्थविदग्धलोकविषय ंव्यङ्ग्यमिति ।

लक्ष्यार्थेन व्यङ्ग्यार्थस्य द्वितीयो ेभेद यथा–

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहए पलोएहि ।

मा पहिअ! रत्तिअन्धअ! सेज्जाए मह णिमज्जहिसि ॥[7]

मह इति निपातोऽनके ार्थवृत्तिरत्रावयोरित्यर्थे न त मर्मेति । एव ं हि विशेष वचनमेव शङ्काकारि भवेदिति प्रच्छन्नाभ्युपगमो न स्यात् । कांचित्प्रोषितपतिकां तरुणीमवलोक्य प्रवृद्धमदनाङ्कुरः सम्पन्नः पान्थोऽनेन निषेधद्वारेण तयाभ्युपगत इति निषेधाभावोऽत्र विधिः न तु निमन्त्रणरूपोऽप्रवृत्तप्रवर्त-नास्वभावः सौभाग्याभिमानखण्डनाप्रसङ्गात् । अत एव रात्र्यन्धेति समुचितसमयसम्भाव्यमानविकारा-कुलितत्व ं ध्वनितम् । भावतदभावयोश्च साक्षाद्विरोधाद्वाच्याद्व्यङ्ग्यस्य स्फुटमेवान्यत्वम् । अथ यद्यपि भवान्मदनशरासारदीर्यमाणहृदय उपेक्षितु ं न युक्तः तथापि किं करोमि पापो दिवसकोऽयमनुचितत्वात्कु-त्सितोऽयमित्यर्थः । न च सवर्थ ा त्वामुपेक्षे, यतोऽत्रैव ाहं तत्प्रलोकय नान्यतोऽहं गच्छामि । तदन्योन्यव-दनावलोकनविनोदेन दिन ं तावदतिवाहयाव इत्यर्थः । प्रतिपन्नमात्रायां च रात्रावन्धीभूतो मदीयायां शय्यायां मा श्लिषः, अपि तु निभृतनिभृतमेवात्ताभिधाननिकटकण्टकनिद्रान्वेषणपूर्वकमितीयदत्र ध्वन्यते ।

काव्यशास्त्र े सुतरां प्रसिद्धमिद ं पद्य ं कामप्यनिर्वचनीयां विच्छित्ति ं धत्ते । प्राकृतस्येदमेव वैशिष्ट्यं यद् भावबोधः, अर्थसङ्गतिः, व्यङ्ग्यचमत्कारश्चात्र विशिष्यणे द्योत्यते । प्राकृतस्यैकमपि पद्य ंतादृश ंनास्ति यत्र कवरेनल्पना विलासः, नवनवोन्मेषस्य प्रथा, रसानुगुणो विन्यासश्च न स्यात् । प्राकृतभाषायां कवेरुद्दामकवित्वशक्तिरप्रतिहतरूपेण पदे-पद े दृग्गोचरीभवतीति विद्यावैभ वसंवलितानां कोविदकुलकुमु-दकलाधराणां चिन्तक्रमः ।

लक्ष्यार्थव्यङ्ग्यार्थयोः सम्बद्धसम्बन्धस्योदाहरण ंयथा–

विपरीअरए लच्छी ब्रह्मं दठ्ठूण णाहिकमलठ्ठं ।

हरिणो दाहिणणअणं रसाउला झत्ति ढक्कइ ॥[8]

अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते, तन्निमीलनेन सूर्यास्तमयः, तेन पद्मस्य सङ्कोचः, ततो ब्रह्मणः स्थगनम्, तत्र सति गोप्याङ्गस्यादशन ेन अनियन्त्रण ं निधुवनविलसितमिति । व्यञ्जनाया अनुमानेऽन्तर्भाव ं प्रदर्शयन्नुदाहरण ं प्रस्तौति–

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण ।

गोलाणईकच्छकुडंगवासिणा दरिअसीहेण ॥[9]

कस्याश्चित्सङ्केतस्थान ं जीवितसवर्स्वायमान ं धार्मिकसञ्चरणान्तरायदोषा त्तदवलप्यमानपल्लवकु-सुमादिविच्छायीकरणाच्च परित्रातुमियमुक्तिः । तत्र स्वतः सिद्धमपि भ्रमण ं श्वभयेनापोदितमिति प्रतिप्रसवात्मको निषेधाभावरूपः, न तु नियोगः, प्रैषादिरूपोऽत्र विधिः । स एव निकुञ्जभ्रमणायो-ग्यतानुमित्यै प्रभवति । यद्यद्भीरुभ्रमण ं तत्तद्भयकारणनिवृत्त्युपलब्धिपूर्वकम् । निकुञ्ज े च सिहोंपलब्धि-रिति व्यापकविरुद्धोपलब्धौ पर्यवसनाद्भ्रमणस्य व्यापिका भयकारणाभावोपलब्धिः प्रतीता । तद्विरुद्धं यद्भयकारण ं तदुपलब्धः । अनुमानञ्चात्र इद ं गोदावरीनिकुञ्ज ं श्वभीरुभ्रमणायोग्य ं सिहंवत्त्वादिति । अत्रोच्यते– श्वभीरोरवीरस्वभावस्य भ्रमणायोग्यत्वमत्र साध्य ं वीरस्वभावस्य वा । विशेषौदासीन्येन तत्सामान्यस्यवै वा आद्य े व्यभिचारः । प्रभोगुरी वा निदश े ेन प्रियानुरागेण निधिलाभादिशङ्कया वा तादृशस्यापि तत्र भ्रमणदशन ात् । अत एव नान्त्योऽपि । मध्यम े तु विरोधः । स्पर्शादिशङ्कया अपौरुषेय तया वा श्वतो बिभ्यतोऽपि मृगयादिकुतूहलेन सिहंवद्देश े वीरस्य भ्रमणात् । किं च पक्षे सिहंसद्भावो न मानान्तरेणावधारितः । किं तु पुंश्चलीवाक्यादवधारितः । न तद्वचन ं निश्चायकम् । अर्थेन सम ं संबन्धानियमात् इत्यनिश्चयरूपा सिद्धिः ।

अत्र व्यक्तिविवेके कारो जगाद– **केवलं योऽसौ भ्रमणविधौ हेतुभावन े दृप्तपञ्चाननव्यापारस्तत्रोपात्तः स एव विमृश्यमानः परम्परया धार्मिकस्य तन्निषेधे पर्यवस्यति तयोर्बाध्यबाधकभावेनावस्थानात् । को ह्यनुन्मत्तः कुक्कुरमात्रसद्भावभयात्**

परिहृतभ्रमणस्तत्रैव दृप्तसिंहसद्भावाशङ्कायामपि सविस्रम्भं भ्रमेदित्यनुमेयार्थविश्रान्तिनियमहेतुर्बाध्यबाधकभावोऽस्त्येवात्र विशेषः। अवश्यं चैतदभ्युपगन्तव्यम्। अन्यथा शुक्तिकारजतप्रतीत्योरपि क्रमभाविन्योरेतात्पर्य-नुयोगप्रसङ्गः केन वार्यते। तस्माद् बाध्यबाधकभावावसायकृत एवात्रोत्तरार्थविश्रान्तिनियम इति स्थितम्।[10] अत्रेदं मप्याक्षिपति महिमभट्टाचार्यः– **अपि च पूर्वोक्तेऽस्मिन्नुदाहरणे दारुणतरानितरा-नृक्षप्रभृतीन् प्रसिद्धतद्व्याप्यारानपास्य यदेतत् करिकलभकुम्भनिर्भेदैकहेवाकिनः केसरिणः कौलेयकवधाभिधानमौचित्यैकनिकेतनस्य कवेस्तत्र चिरं चिन्तयन्तोऽप्यभिप्रायं न विद्मः। न हि दृप्ततया यत्किञ्चनकारिणोऽन्यस्यापि स्वजातिसमुचितं चरितमपहायाप्रसिद्धमेव किमपि रसभङ्गीरवः कवयो वर्णयितुमाद्रियन्ते किमुत जगद्विदितव्यापारस्य केसरिणः।**[11]

प्राकृतस्य पद्यमिदं संस्कृतकाव्यशास्त्रे भूयिष्ठां चमत्कृतिमादधाति। नैकेषु ग्रन्थेषु पद्यमिदं कविभिः समादरेण समुदाहृत इति महद्गौरवमस्या भाषायाः। भाषायामस्यां यादृशी व्यङ्ग्यार्थप्रतीतिर्भवति न तादृशी कुत्रचित्। इदमेव वैशिष्ट्यमुररीकृत्य प्राकृतपद्यानि प्रति काव्यशास्त्रिणां विदुषां तावद्बहुमानो विलोक्यते। शब्दार्थयोजना, पदसंघटना, उत्कटो भावबोधः, व्यङ्ग्यार्थरमणीयता, रसपरिपाकश्चात्र भाषायामस्यां साक्षात्क्रियन्ते सहृदयहृदयैः।

हतवृत्तदोषस्योदाहरणं यथा–

जं परिहरिउं तीरइ मणअं पि ण सुन्दरत्तणगुणेन।
अह णवरं जस्स दोसो पडिपक्खेहिं पि पडिवण्णो ॥[12]

उदाहरणमिदं रसाननुगुणं च वृत्तं यत्र तत् हतवृत्तम् इत्यस्यं वेत्तात्मात्रावृत्ते स्थानविशेषे गणविशेषयोगस्येदमुदाहरणम्। मानवतीं प्रति दूत्यः समाधानोक्तिरियम्। तथाविधमेतत्कामचेष्टितं यत्सौन्दर्यगुणेन रमणीयतारूपेण गुणेन मनागपि परिहतुं न शक्यते। अथ च यस्य दोषः पूर्वोक्तापरिहार्यत्वस्वरूपः प्रतिपक्षैरपि ब्रह्मचर्यादिभिः

केवलं प्रतिपन्नोऽङ्गीकृतः न तु परिहृतः। त्वत्कान्तस्य तु कैव कथेति तस्य दैवादन्यवनितासंगमेऽपि कोपातिशयो न विधेय इति भावः। अत्रार्यायां द्वितीयस्य हरिउं इत्यन्तगुरोः सगणस्य तीरइ इति तृतीयस्यादिगुरोर्भगणस्य चाश्रव्यत्वं छन्दःशास्त्रसिद्धम्।

वक्तृप्रतिपाद्यव्यङ्ग्यवाच्यप्रकरणादीनां महिम्ना दोषोऽपि क्वचिद्गुणो भवति। अस्मिन्नेव सन्दर्भे उदाहरणमिदमत्थं प्रदर्श्यते। गर्भिततत्वदोषोऽपि क्वचिद् गुणो भवति। यथा–

हुमि अवहत्थिअरेहो णिरंकुसो अह विवेअरहिओ वि।
सिविणे वि तुमम्मि पुणो पत्तिहि भत्तिं ण पसुमरामि॥[13]

कामं प्रतियौवनस्येयमुक्तिरिति केचित्। मलयानिलादिसहचरसंप्तौ कामं प्रतीयं तरुणोक्तिरि-त्यन्ये। गुरुं प्रति शिष्योक्तिरित्यपरे। अत्र त्वं प्रतीहीति वाक्यगर्थितत्वं दृढप्रत्ययार्थतया गुणो जातः।

अधमप्रकृत्युक्तिषु ग्राम्यत्वं गुणो भवति। उदाहरणं यथा–

फुल्लुक्करं कलमकूरिणिहं वहंति जे सिन्धुवारविडवा मह वल्लहा दे।
जे गालिदस्स महिसीदहिणो सरिच्छा दे किं च मुद्धविअइल्लपसूणपुंजा॥[14]

राजशेखरविरचितस्य कपूर्रमञ्जरीसट्टकस्य पद्यमिदं वर्तते। अत्र विदूषकोक्तौ कलमभक्तमहि-षीदधिशब्दा ग्राम्या अपि गुणतोमवप्रस्फुटन्ति।

अर्थान्तरसङ्क्रमितध्वनौ कथितपदत्वदोषो न भवतीति विषयमुल्लिखति स्पष्टतया मम्मटाचार्यः– अस्योदाहरणं यथा–

ताला जाअंति गुणा जाला दे सहिअएहि घेप्पन्ति।
रइकिरणाणुग्गहिआइं होन्ति कमलाइं कमलाइं॥[15]

विषमबाणलीलायामागतमिदं पद्यम्। भवन्ति कमलानि कमलानि इत्यत्र कमलानि इति द्वितीये सौरभसौन्दर्यादिविशिष्टकमलमित्यस्य विशिष्टार्थस्य बोधकत्वादत्रार्थान्तरसङ्क्रमितवाच्यध्वनिः वर्तते। अतोऽत्र पुनरुक्तिर्नास्ति।

प्रतिकूलानुभावपरिग्रहे दोषो भवति रसस्य। अस्योदाहरणमित्थं दर्श्यते

णिहुअरमणम्मि लोअणपहम्मि पडिए गुरुअणमज्झम्मि।
सअलपरिहारहिअआ वणगमणं एव्व महइ वहू॥[16]

अत्र सकलपरिहारवनगमने उभावपि शृङ्गाररसविरोधिशान्तरसस्यानुभावौ स्तः। अत्र एतावपि द्वौ प्रकृतस्य विप्रलम्भशृङ्गारस्य प्रतीतौ बाधकौ स्तः। परन्तु इन्धनाद्यानयनव्याजेनोपभोगार्थं वनगमने चेत्तन दोषः।

भाषाश्लेषसन्दर्भे संस्कृतप्राकृतयोर्द्वयोः अर्थोऽत्र संगच्छते। आचार्यानन्दवर्धनप्रणीतदेवीशतके पद्यमिदमागतमस्ति। पद्यमिदं यथा–

महदेसुरन्धम्मे तमवसमासङ्गमागमाहरणे।
हरबहुसरणं तं चित्तमोहमवसरउमे सहसा॥[17]

महदे! गौरी! आगमाहरणे वेदविद्योपार्जनानुरागे समासङ्गं सामञ्जस्यं कुरु। चित्तस्याज्ञानं सपदि अपसरतु मे सहसा।

संस्कृतार्थोऽयम्– हे हरवधू पार्वति त्वमेका शरणं मम। सर्वदा मे प्रीतिः धर्मे स्यात् तथा तमोवशां तमोगुणायत्ताम् गमागमात्संसारात् शरणं त्वं भवसीति शेषः।

वाक्यगार्थी- उपमानलुप्ताया उदाहरणमिदं यथा–

सअलकरणपरवीसामसिरिविअरणं ण सरसकव्वस्स।
दीसइ अह व णिसम्मइ सरिसं अंसंसमेत्तेण॥[18]

काव्यं भवत्यत्रोपमेयम्, उपमानं नोच्यते, सकलकरणपरविश्रामश्रीवितरणसाधारणधर्मोऽयम्। सदृशश्चोपमावाचकं पदमिदम्। इदमेव कव्वस्स इत्यत्र कव्वसमम्, सरिसं इत्यत्र णूणं इति पाठेतस्मात् समासगाया उदाहरणमिदं वर्तते। समासगा द्विलुप्तोपमाया इदमुदाहरणं द्रष्टव्यम्, यथा–

टुण्टुणण्तो मरिहसि कण्टअकलिआइं केअइवणाइं।

मालइकुसुमरिच्छं भमर! भमन्तो पाविहिसि ॥[19]

अत्र मालतीकुसुममुपमेयम्, सदृश इत्युपमावाचको शब्दः। साधारणधर्मोपमानयोः प्रयोगोऽत्र न भवतः। तस्माद् द्विलुप्ताया उदाहरणमिदम्। मालतीकुसुमसदृशम् एकदेशविवर्तिरूपकस्योदाहरणम् इद ंयथा–

जरस रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअम्।

रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥[20]

अत्र रणस्यान्तःपुरत्वमारोप्यमाण ंशब्दोपात्तम्। मण्डाग्रलतायाः नायिकात्वम्। रिपुसेनायाश्च प्रतिनायिकात्वम् अर्थसामर्थ्यादवसीयत े इत्येकदेश े विशेषेण वर्तनादेकदेशविवर्ति। प्रकृतार्थप्रतिपाद-कवाच्येन श्लिष्टविशेषणमाहात्म्यात्, न तु विशेषस्य सामर्थ्यादपि, यद् अप्रकृतार्थस्याभिधान ं सा समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिर्भवति। अस्योदाहरण ंयथा–

लहिऊण तुज्झ बाहुप्फंस ंजीए स को वि उल्लासो।

ज अलच्छी तुह विरेह ण हूज्जला दुव्वला णं सा ॥[21]

अत्र विशेष्यवाचिनो जयलक्ष्मीशब्दस्य परमप्रकृतार्थकत्व ं नास्ति। अत्र बाहुस्पर्शलाभप्रयुक्तो-ल्लासादिसाधारणविशेषणबलाज्जयलक्ष्मी वृत्तान्तो नायिकावृत्तान्तरूपतया गम्यत इति।

अतिशयोक्त्यालङ्कारस्य द्वितीयभेद े प्रस्तुतस्यार्थस्यान्यरूपेण भेदो निश्चीयते। समानजातीय ंवस्तु तद्भिन्नासमानजातीयमित्युच्यत ेभेद्नस्मिन्। यथा-

अण्णं लडहत्तणअं अण्णा विअ का वि वत्तणच्छाआ।

सामा समाण्णपआवइणो रेह च्चिअ ण रोई ॥[22]

अत्र लोकप्रसिद्धस्य सौन्दयर्स्य शरीरकान्तेश्च वर्णनमलौकिकरीत्या कविनाकारि। निर्माणपरि-पाटी रेखामात्रेणापि नास्तीति भावः। इयमन्यत्ववर्णनरूपातिशयोक्तिः।

दीपयति अप्रस्तुतमपि पदार्थं बुद्धौ प्रकाशयति अर्थात् सुन्दरीकरोतीति दीपकः। वस्तुतः प्राकरणिकाप्राकरणिकानामर्थादुपमानोपमये ानां धर्मः क्रियादिः एकवारमव े यदुपादीयत े तत् एकस्थस्यैव समस्तवाक्यदीपनाद् दीपकमिति। अयमपि कश्चन अर्थोऽस्य– एकस्थस्यैव सर्ववाक्यप्रकाशत्वेन दीपसाम्याद्दीपकमित्यर्थः। अस्योदाहरण ं यथा–

किवणाणं धणं णाआणं फणमणी केसराई सीहाणं।

कुलवालिआणं त्थणआ कुत्तो छिप्पन्ति अमुआणं॥[23]

अत्र वण्यर्त्वेन प्रकृतानां कुलवधूस्तनानां तदुपमानत्वेनाप्रकृतानामन्येषां च कुतः सस्पृश्यन्त इति सकृद्धर्मोपानाद्दीपकालङ्कारः। श्लोकस्यास्य यादृशो भाव आस्त े स नितान्त ं हृदयग्राही वर्तते। स्फुटा भाषा, रसपरिपाकः सरसा मधुरिमा चास्य पद्यस्य रञ्जयन्ति मनांसि सचेतसाम्। सर्वमेतत्प्राकृतस्यैव चमत्कारः।

विवक्षितस्य प्राकरणिकत्वादनुपसर्जनीकायर्स्य अशक्यवक्तव्यमतिप्रसिद्धत्व ं वा विशेष ं वक्तुं निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपो भवति। तत्र प्रथमस्याक्षेपस्य निदर्शन ं यथा–

ए एहि किपि कीएवि कएण णिविवव भणामि अलमहवा।

अविआरिअकज्जारंभआरिणी मरउ ण भणिस्सम्॥[24]

वक्ष्यमाणविषयकस्याक्षेपस्योदाहरणमिदम्। अत्र वियोगिन्या नायिकायाः काचित् सखी नायकमन्तिके सन्देश ं गृहीत्वा आगता वर्तते। परन्तु तस्य नायकस्य दशामकथयित्वैव पूर्वमेव सा निषेधयति। अत्र विरहदुर्दशातिशयो वक्ष्यमाणो वक्तुमशक्यतया निषिद्ध इत्याक्षेपालङ्कारः। यत्र सहार्थ-बलादके ार्थाभिधायकमपि यत् उभयस्याप्यवगमकं सा सहोक्तिः। यत्र े यांषवस्तूनां सहभावो वर्ण्यतेतत्र तेष्वेकम्प्रधानम् अपरञ्चाप्रधान ं भवति। सहयुक्तेऽप्रधान े इत्यस्मिन् पाणिनीयूसत्रेअप्रधान े तृतीया प्रधान े च प्रथमाविभक्तेः निर्देशो वर्तते।

यथा पुत्रेण सहागतः पिता अत्र पिता वर्ततेप्रधानः, अप्रधानश्च पुत्रः। अतः

पुत्रेण इत्यत्र तृतीया, पिता इत्यत्र प्रथमाविभक्तिः । अत्र आगतः इत्यस्याः क्रियायाः साक्षादन्वयो भवति । पुत्रणे इत्यनने पदने नवै । अतोऽत्र आगतः पदमिदम् एकार्थसम्बद्धम् एकार्थाभिधायी वर्तते। परन्तु सह इत्यस्मात्पदसामर्थ्यात् पुत्रशब्देनसह तस्य गौणसम्बन्धः कथ्यते । तस्मादय ंद्विवाचको भवति । इत्थं यत्र सहशब्दप्रयोगेन काव्योचितचमत्कारविशेषः प्रतीयत े तत्र सहोक्तिरलङ्कारः । अस्योदाहरण ं यथा प्राकृतनिबद्धं पद्यमिदम्—

सह दिअहणिसाहिं दीहरा सासदण्डा सह मणिवलर्येहि वाप्पधारा गलन्ति ।

तुह सुहअ विओए तीअ उव्विग्गिरीए सह अ तणुलदाए दुव्वला जीविदासा ।।[25]

अत्र श्वासदण्डेषु दीर्घत्वान्वयः शाब्दो विशेषतौ दिवसनिशादौ साहित्यप्रतीत्या आर्थ इत लक्षणसंगतिः । दिवसादिभिस्तु सहान्वयबलात् ।

पर्यायोक्तालङ्कारप्रसङ्गे विषमबाणलीलायामागतमिदमुदाहरण ं नितान्तमास्ते । वस्तुत एकं वस्तु क्रमेणनेकस्मिन् भवति क्रियत ेवा स पर्यायो भवति । एकमेनकस्मिन् क्रियत े अर्थात् एकं वस्तु क्रेमणअनेकस्मिन् क्रियते । अस्योदाहरण ंयथा—

तं ताण सिरिसहोअररअणाहरणंमि हिअअमेक्करसम् ।

बिम्बाहरे पिआणं णिवेसिअं कुसुमबाणेण ।।[26]

अत्र श्रीसहोदररत्नाहरण ेइत्यस्मिन् स्थान ेश्रीसहोदररत्नाभरण ेअयमपि पाठः कुत्रचिल्लभ्यते । श्रीसहोदररत्न ं कौस्तुभ आभरण ं यस्य तस्मिन् श्रीविष्णौ । हृदय ं कुसुमबाणेन प्रियाणां कान्तानां बिम्बसदृशेऽधरे विनिर्वेशितमित्यनेकत्र स्थितौ प्रयोजकनिर्देशाद्भेदः । न भवति प्राकृतभाषायां लिङ्गव-चनयोः कश्चन नियमः । अत्र राक्षसाणां मनः प्राक् कौस्तुभमणिमवाप्तय े समुत्सुकम् आसीदथवा विष्णोः स्वरूप े तत्परमासीत् । अधुना तन्मनो मोहिन्या बिम्बाधरासक्तमजायदिति पर्यायालङ्कारोऽत्र । अर्थयोरे-कक्रियामुखेन परस्परं कारणत्व े सति अन्योन्यनामालङ्कारः । अस्योदाहरण ं यथा—

हंसाणं सरेहिं सिरी सारिज्जइ अह सराण हंसेहिं ।
अण्णोण्णं विंअ एए अप्पाणं णवर गरुअन्ति ॥[27]

अत्र सरोहंसयोः परस्परं शोभासारीकरणरूपोपकारजनकत्वादन्योन्य ं नामालङ्कारः । उत्तर-श्रुतिमात्रेण यत्र प्रश्नकल्पना क्रियत े तथा च यत्र प्रश्न े सत्यसकृदसम्भाव्यमुत्तरं स्यात् तदुत्तरालङ्कारो भवति । प्रतिवचनोपलम्भोदव पूर्ववाक्य ं प्रश्नो वा यत्र कल्प्यत े तदंक्भवति तावदुत्तरम् । यथा–

वाणिअअ हत्थिदन्ता कुत्तो अम्हाणं वग्धकित्ती अ ।

जाव लुलितासअमुही धरस्मि परिसक्कए सोण्हा ॥[28]

हस्तिदन्तव्याध्रकृत्तीनामहमर्थी ता मूल्येन प्रयच्छेति क्रेतुर्वच्नम् अमुना वाक्येन समुन्नीयते । प्रश्नादनन्तरं लोकातिक्रान्तगोचरतया यदसम्भाव्यरूप ं प्रतिवचन ं स्यात्तदपरमुत्तरम् । अनयोश्च सकृदु-पादान े न चारुताप्रतीतिरित्यसकृदित्युक्तं यथा–

का विसमा देव्वगई किं लद्धं जं जणो गुणग्गाही ।

किं सोक्खं सुकलत्तं किं दुक्खं जं खलो लोओ ॥[29]

अत्र दैवगत्यादेर्वैषम्यादि लोकप्रसिद्धमेव प्रकाशते । वाच्यार्थ एवात्र विश्रान्तिः विलोक्यते ।

यद्देश ं कारण ं तद्देशमेव कार्यमिति नयः । यत्र धूमः तत्र वह्निः । यत्र तु कार्यकारणभूतयोर्द्वयोर्ध-र्मयोः केनाऽप्यतिशयेन नानादेशतया युगपदवभासनम्, सा तयोः स्वभावोत्पन्नपरस्परसङ्गतित्यागाद-सङ्गतिः नाम अलङ्कारो भवति । अस्योदाहरणमित्थं प्रदर्श्यते–

जस्सेअ वणो तस्सेअ वेअणा भणइ तं जणो अलिअं ।

दण्तक्खअं कवोले बहूए वेणआ सवत्तीणं ॥[30]

अत्र शारीरमानसयोर्वेद नयोरेकत्वाध्यवसायो मूलम् । अत्र वदे नादन्तक्षतयोः कार्यकारणयोर्वैय-धिकरण्यरूपासंगतिरलङ्कारः । वैयधिकरण्येन प्रतीतिबलाद्यत्र

समानाधिकरणानां धर्माणां प्रतीत्या विरोधस्वीकरणं भवति तैत्रासङ्गतिः ।

यः पदार्थः केनचिदाकारेण नियतो यदा कदाचिदनुभूतोऽभूत्, स कालान्तरे स्मृतिप्रतिबोधाधा-यिनीति तत्समाने वस्तुनि दृष्टे सति यत्तथैव स्मर्यते। तद्भवेत्स्मरणमिति । यथा–

करजुअगहिअजसोआत्थणमुहविणिवेसिआहरपुडस्स ।

सम्भरिअपञ्चजण्णस्य णमह कण्हस्स रोमाञ्चं ॥[31]

अत्र जन्मान्तरानुभूतस्मरणमिति ।

उपमानस्य यत्र व्यर्थतायाः प्रतिपादनं क्रियते अर्थात् अस्य धुरं सुतरामुपमेय**मेव** वोढुं प्रौढमिति कैमथ्यर्ने यदुपमानामाक्षिप्यते तत्र भवति प्रतीपालङ्कारः । यदपि तस्यैवोपमानतया प्रसिद्धस्य उपमाना-न्तरविवक्षयाऽनादरार्थमुपमेयभावः कल्प्यते, तदुपमेयस्योपमानप्रतिकूलवर्तित्वादुभयरूपं प्रतीपम् ।

द्वितीयस्य प्रतीपस्योदाहरणं यथा–

ए एहि दाव सुन्दरि कण्णं दाऊण सुणसु वअणिज्जम् ।

तुज्झ मुहेण किसोअरि चन्दो उअमिज्जइ जणेण ॥[32]

अत्र मुखेनोपमीयमानस्य शशिनः स्वल्पतरगुणत्वात् उपमित्यनिष्पत्त्यां वअणिज्जम् इति वचनीयपदाभिव्यङ्ग्यतिरस्कारः ।

यत्र एकमपि वस्तु यत् एकेनवै स्वभावेन युगपदनेकत्र भवति तत्र द्वितीयो विशेषालङ्कारो भवति- अस्योदाहरणं यथा–

सा वसइ तुज्झ हिंअए सा च्चिंअ अच्छीसु सा अ वअणेसु ।

अह्मारिसाण सुन्दर ओअसो कत्थ पावाणं ॥[33]

अत्रैकस्याः कामिन्या एकरूपणे युगपदनके त्र स्थितिवर्णन ादपरो भदे ः । अत्युज्ज्वलगुणयोगेऽपि यदि न्यूनगुणोऽप्रकृतः प्रकृतस्य गुणं नानुहरति तदा

अतद्गुणालङ्कारो भवति । निदर्शनंयथा–

धवलोऽसि जहवि सुन्दर तहवि तुए मज्झ रज्जिअं हिअअं ।

राअभरिए वि हिअए सुहअ णिहित्तो ण रत्तोसि ॥[34]

अत्रोत्तरार्धेऽप्रस्तुतेन गायकेन निवेदनीयवृत्तान्ततया प्रकृतस्य हृदयस्य गुणाननुहरणादतद्गु-णोऽलङ्कारः ।

यत्र नैकेऽलङ्काराः परस्परं निरपक्षे रूपतया स्थिता भवन्ति तत्र ससृ ष्टिः । शब्दार्थालङ्कारयोः संसृष्टिर्यथा–

सो णत्थि एत्थ गामे जो एअं महमहन्तलाअण्णं ।

तरुणाण हिअअलूडिं परिसक्कन्तीं णिवोरेइ ॥[35]

अत्र "णत्थि एत्थ " इत्यत्र त्थ इत्यस्यानुप्रासः पुनश्चोत्तरार्द्धे हिअअलूडिं(हृदयलुण्ठाकीम्) अत्र रूपकालङ्कारो वतर्त े । संसृ ष्टिश्च तयोरेकत्र वाक्य े छन्दसि वा समेवत्वात् ।

द्वयोर्बहूनां वा अलङ्काराणामेकत्र समावेशेऽपि विरोधान्न यत्र युगपदवस्थान ं न चैकतरस्य परिग्रहे साधकं तदितरस्य वा परिहारे बाधकमस्ति ेयैकतर एव परिगृह्येत स निश्चयाभावरूपो द्वितीय सङ्करः सन्देहसङ्करो भवति ।यथा–

जह गहिरो जह रअणणिब्भरो जह अ णिम्मलच्छाओ ।

तह किं विहिणा एसो सरसवाणीओ जलविहीण किओ ॥[36]

अत्र किं समुद्र े श्लिष्टविशेषणमहिम्नाप्रस्तुतपुरुषविशेषप्रतीतेरिय ं समासोक्तिः, किं वाब्धरेप्रस्तु-तात्प्रस्तुतस्य पुरुषविशेषस्य तत्समानगुणतया प्रतिपत्तरेप्रस्तुतमिति संदेहः । तस्मादत्राय ं द्वयोः सङ्करः ।

इत्थमिय ं भाषा गौरवस्य सौष्ठवस्य माधुर्यस्य सौभाग्यस्य औदार्यस्य गाम्भीर्यस्य नैमर्ल्यस्य मार्दवस्य चाधिष्ठानवनीति सप्रमोदमुपच्छन्दिता, हृदयपरिष्करणाय चाप्रतिद्वन्द्व ं प्रभुरिति सत्यतमनि-न्दिता चेति नात्र विस्तारयितुमावश्यकम् । भाषायामस्यां महती ं

प्रीति ंप्रदर्शयन् राजानको मम्मटः प्राकृतप्रियः इति नाम्ना कविकुले प्रसिद्धिमवाप। धन्यंय भाषा, धन्यश्च प्राकृतप्रियो मम्मटः, धन्याश्च प्राकृतपाठकाः।

पादटिप्पणी

1. नवमर्थदर्शन ंसन्निवेशशिशिरा बन्धर्द्धयः।
अविरलमेतदाभुवनबन्धमिह केवलं प्राकृते॥ गउडवहो

2. गूढार्थदेशरहित ंसुललितवर्णैर्विरचित ंरम्यम्।
प्राकृतकाव्य ंलोके कस्य न हृदय ंसुखयति॥
पञ्चमीमाहात्म्यम्(महेश्वरसूरिः)

3. पुरुषाः सस्ंकृतबन्धाः प्राकृतबन्धोऽपि भवति सुकुमारः।
पुरुषमहिलानां यावदिहान्तरं तावदेतेषाम्॥ कपूर्रमञ्जरी

4. ललित ेमधुराक्षरे युवतिजनवल्लभ ेसशृङ्गारे।
सति प्राकृतकाव्य ेक शक्नोति सस्ंकृत ंपठितुम्॥
वज्जालग्ग

5. वानीरकुञ्जोड्डीन शकुनिकोलाहलं शृण्वन्याः।
गृहकमर्व्यापृताया वध्वाः सीदन्त्यङ्गानि॥ काव्यप्रकाशः, 5/132

6. कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि वारितवाम ेसहस्वेदानीम्॥ तत्रैव, 5/135

7. श्वश्रूरत्र निमज्जति अत्राहं दिवसके प्रलोकय।
मा पथिक रात्र्यन्ध शय्यायां मम निमंक्ष्यसि॥ तत्रैव, 5/136

8. विपरीतरत ेलक्ष्मीर्ब्रह्माण ंदृष्ट्वा नाभिकमलस्थम्।
हरेर्दक्षिणनयन ंरसाकुला झटिति स्थगयति॥ तत्रैव, 5/137

9. भ्रम धार्मिक विश्वस्तः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंह॥ तत्रवै , 5/138

10. व्यक्तिविवेकः, ध्वनिखण्डनप्रसङ्गे

11. तदेव

12. यत् परिहतु ंतीर्यत ेमनागपि न सुन्दरत्वगुणेन।
अथ केवलं यस्य दोषः प्रतिपक्षैरपि प्रतिपन्नः॥
काव्यप्रकाशः,7/217

13. भवाम्यपहस्तितरेखा निरङ्कुशोऽथ विवेकरहितोऽपि।
स्वप्नेऽपि त्वयि पुनः प्रतीहि भक्तिं न प्रस्मरामि॥ तत्रैव, 7/321

14. पुष्पोत्करं कलमभक्तनिभ ंवहन्ति
य ेसिन्धुवारविटपा मम वल्लभास्ते।
य ेगालितस्य महिषीदध्नः सदृक्षास्त े
किं च मुग्धविचकिलप्रसूनपुञ्जाः॥ तत्रैव, 7/310

15. तदा जायन्त ेगुणा यदा त ेसहृदयैर्गृह्यन्ते।
रविकिरणानुगृतीतानि भवन्ति कमलानि कमलानि॥
तत्रैव, 7/316

16. निभृतरमण ेलोचनपथे पतित ेगुरुजनमध्ये।
सकलपरिहारहृदया वनगमनेवच्छेति वधूः॥ तत्रैव, 7/329

17. मम देहि रस ंधर्म ेतमोवशाम् आशां गमागमात् हर नः।
हरबधु शरण ंत्व ंचित्तमोहोऽपसरतु म ेसहसा॥तत्रैव, 9/373

18. सकलकरणपरविश्रामश्रीवितरण ंन सरसकाव्यस्य।
दृश्यतेऽथवा निशाम्यत ेसदृशमशांशमात्रेण॥
तत्रैव,10/401

19. टुण्टुणायमानो मरिष्यसि कण्टककलितानि केतकीवनानि ।
मालतीकुसुमसदृश ंभ्रमर भ्रमन् न प्राप्स्यसि ॥तत्रैव, 10/408

20. यस्य रणान्तःपुरे करे कुर्वतो मण्डालाग्रलताम् ।
रससम्मुख्यापि सहसा पराङ्मुखी भवति रिपुसेना ॥तत्रैव, 10/423

21. लब्ध्वा तव बाहुस्पर्शं यस्याः स कोऽप्युल्लासः ।
जयलक्ष्मीस्तव विरहे न खलूज्ज्वला दुर्बला ननु सा ॥ तत्रैव, 10/435

22. अन्यत् सौकुमार्यमन्यैव च कापि वर्तनच्छाया ।
श्यामा सामान्यप्रजापतेः रेखैव च न भवति ॥तत्रैव, १०/४५१

23. कृपणानां धन ंनागानां फणमणिः केसराः सिहांनाम् ।
कुलबालिकानां स्तनाः कुतः स्पृश्यन्तेऽमृतानाम् ॥तत्रैव, 10/458

24. ए एहि किमपि कस्या अपि कृत ेनिष्कृप! भणामि अलमथवा ।
अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्यामि ॥ तत्रैव, 10/472

25. सह दिवसनिशाभिः दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
तव सुभग! वियोग ेतस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥तत्रैव, 10/496

26. तत्तेषां श्रीसहोदररत्नाहरण ेहृदयमेकरसम् ।
बिम्बाधरे प्रियाणां निर्वेशित ंकुसुमबाणेन ॥तत्रैव, 10/516

27. हंसानां सरोभिः श्रीः सार्यतेऽथ सरसां हंसैः ।
अन्योन्यमेवैत आत्मान ंकेवलं गुरूकुर्वयन्ति ॥ तत्रैव, 10/528

28. वाणिजक! हस्तिदन्ताः कुतोऽस्माकं व्याघ्रकृत्तयश्च ।
यावत् लुलितालकमुखी गृहे परिष्वक्कत ेस्नुषा ॥तत्रैव, 10/529

29. का विषमा दैवगतिः किं लब्धव्य ंयत् जनो गुणग्राही ।
किं सौख्य ंसुकलत्र ंकिं दुःख ंयत् खलो लोकः ॥तत्रैव,10/530

30. यस्यैव व्रणस्तस्यैव वेदना भणति तज्जनोऽलीकम् ।
दन्तक्षत ंकपोले वध्वा वेदना सपत्नीनाम् ॥तत्रैव, 10/534

31. करयुगगृहीतयशोदास्तनमुखविनिर्वेशिताधरपुटस्य ।
सस्मृतपाञ्चजन्यस्य नमत कृष्णस्य रोमाञ्चम् ॥तत्रैव, 10/552

32. अयि एहि तावत् सुन्दरि! कण ंदत्त्वा शृणुष्व वचनीयम् ।
तव मुखेन कृशोदरि! चन्द्र उपमीयत ेजनेन ॥तत्रैव, 10/555

33. सा वसति तव हृदय ेसैवाक्षिषु सा च वचनेषु ।
अस्मादृशीनां सुन्दर! अवकाशः कुत्र पापानाम् ॥तत्रैव, 10/561

34. धवलोऽसि यद्यपि सुन्दर! तथापि त्वया मम रञ्जित ंहृदयम् ।
रागभरितेऽपि हृदय ेसुभग! निहितो न रक्तोऽसि ॥ तत्रैव, 10/565

35. स नास्त्यत्र ग्राम ेय एनां महमहायमानलावण्याम् ।
तरुणानां हृदयलुण्ठाकी ंपरिष्वक्कमानां निवारयति ॥ तत्रैव, 10/570

सन्दर्भग्रन्थसूचिः

1. गाथासप्तशती, भट्टश्रीमथुरानाथशास्त्री, मोतीलाल बनारसीदास, दिल्ली, पुनर्मुद्रण, 1983

2. काव्यप्रकाश, आचार्यविश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी, जून 2005

3. ध्वन्यालोकः, आचार्यजगन्नाथपाठकः, चौखम्बाविद्याभवनम्, वाराणसी, 2011

4. व्यक्तिविवेकः, जयकृष्णदास हरिदासगुप्त, चौखम्बा सस्कृत सीरीज ऑफिस, बनारस, 1936

5. प्राकृतव्याख्यावृत्तिः, श्रीत्रिविक्रमदेवः, जयकृष्णदासहरिदासगुप्ता, चौखम्बा सस्कृत सीरिज ऑफिस, संवत्
2007

6. काव्यप्रकाशः(बालबोधिनीटीका), भट्टवामनाचार्यः, परिमल पब्लिकेशन्स, दिल्ली,2008

7. काव्यप्रकाशः(सोलह टीकाओं सहित), डॉ. ज्योत्स्ना मोहन, नाग प्रकाशक, दिल्ली, प्रथम सस्करण 1995

8. कपूर्रमञ्जरी, पं. दुर्गाप्रसाद तथा वासुदेवलक्ष्मण शास्ती पणशीकरः, निर्णयसागर प्रेस, बोम्बे, 1927

9. ज्ञानपञ्चमीकथाः(श्रीमहेश्वरसूरिकृताः), आचार्य जिनविजयमुनि, भारतीयविद्याभवन, बम्बई, 1949

10. प्राकृत रत्नाकर – प्रो. प्रेमसुमन जैन, प्राकृत अध्ययन एवं संशोधन सस्थान, श्रवणबेलगोला, कर्नाटक,
2012

11. प्राकृत भाषा और व्याकरण के विविध आयाम, प्रो. राधावल्लभ त्रिपाठी,रा.,सं. सं.,नयी दिल्ली,2010

12.प्राकृत साहित्य की रूपरेखा,डा.तारा डागा,प्राकृत भारती,जयपुर,2006

13.प्राकृत साहित्य का इतिहास,डा.जगदीश चन्द्र जैन,चौखम्बा विद्या भवन,वाराणसी,1995

श्रीशाण्डिल्येनाथर्वणात्प्राप्तब्रह्मविद्या।

केशवकुमारः मन्था
प्रो. कलापिनी अगस्ती

सारांशः।

परब्रह्मा श्रीमद्दत्तात्रेयः निर्गुणनिराकारः सच्चिदानन्दरूपमकेमेवाद्वितीयः भक्तानुद्धर्तुं सगुणसाकाररूपेण नैकावताराङ्गृहीत्वा अधिकारतारतम्येन ज्ञानभक्तिवैराग्यमष्टाङ्गयोगश्च भक्तानुपदिश्य तान्कृतार्थान्कारयामास। स परमात्मा ब्रह्मविष्णुमहेश्वरेति पृथक्पृथग्रूपैः जगदुत्पत्तिस्थितिलयं कारयन् श्रीमद्दत्तात्रेयरूपेण जगन्नियन्त्रणार्थमात्मानमभिव्यञ्जयति पूर्वमभिव्यक्तः आगामिकालेऽपि अभिव्यञ्जयिष्यति।

स्वधर्मोचित नित्यनैमित्तिककर्मानुष्ठानैर्योगसाधनैः साधनचतुष्टैः भक्त्युपासनामार्गैश्च तथा गुरूपदिष्टमहावाक्यश्रवणमनननिदिध्यासनैरेव मोक्षं लभते इति श्रीमद्दत्तात्रेयः सच्चिदानन्दसद्गुरुः मुमुक्षूनुपदिशति।

स्वस्वरूपज्ञानेनैव मोक्षप्राप्तिर्भवति न तु केवलपदार्थज्ञानेन। ब्रह्मवेत्तनैव मोक्षप्राप्तिः न तु केवलकर्माचरणने। लौकिकदःखुः क्षणिकः तस्य निवत्तिरपि क्षणिकः। अर्थादद्वितीयात्मज्ञानेनैव शोकं तीर्त्वा अखण्डसखुप्राप्तिः सम्भवति। सर्वजीवेषु आत्मा एकमेव यथा एकश्चन्द्रस्य प्रतिबिम्बः जलेऽनेकवद्भासते तथैव आत्मा एकोऽपि नानारूपवद्गोचरीभवति। तस्मादात्मद्रष्टा एव मोक्षं लब्धुं शक्यते इति स्वामिना प्रतिपादितः।

परमपूज्य श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामिना संस्कृतभाषायां श्रीमद्दत्तपुराणं विरच्य महोत्तरलोकोपकारणं कारयामास। तत्र श्रीमद्दत्तात्रेययोगिना अथर्वणयोगिना च प्राप्त ब्रह्मज्ञानं तथा अथर्वणने शाण्डिल्यमुपदिष्ट ब्रह्मज्ञानं सर्वेषां कृते फलीभवन्तीत्याशासे।

प्रस्तावना

यावत्पर्यन्तमीश्वरानुग्रहं न भवति तावत्पर्यन्तं मानवानां समीचीनं शास्त्रज्ञानं तथा सद्गुरुः न लभन्ते ।[1] ईश्वराराधनबुद्ध्या स्वधर्माचरणने सज्जनानां परमेश्वरीप्रसादनैव सद्गुरोः प्राप्तिः सुकरं भवति ।[2] सद्गुरोरनुग्रहेणै व साधकस्य सञ्चित पापराशी भस्मीभवति । सद्गुरु प्रसादितज्ञानस्य श्रवणमननिदिध्यासनेन संशयभावनानां असम्भावनानां तथा च विपरीतभावनानां निरसनमुत्पद्यते । तस्मात् मोक्षप्राप्तिः द्राकिति सिद्ध्यति ।[3]

परमेश्वरस्य कृपाप्रसादनैव सद्गुरोः दशर्नभाग्य तंथा च तस्य प्राप्तिभव ति नान्यत्साधनैः शक्यते । परमेश्वरस्वरूपस्य यथार्थज्ञानं सदुरुविना असम्भवम् । यथा सद्गुरोः प्राप्तेः ईश्वराराधनबुद्ध्या मानवाः यतन्ते तथैव नित्यनैमित्तिक-स्वधर्मोचितकर्मानुष्ठानमाचरेयुः । इदमेव धर्माचरणमिति कथ्यन्ते बुधैः । मानवाः सम्यग्धर्माचरणैः स्वरूपाभिमानरहिताः भूत्वा कर्मफलापेक्षापि न काङ्क्ष्येयुः । ईदृक् स्वधर्माचरितसज्जनानामेव परमेश्वरानुग्रहं लभ्यते । तदनुग्रहेणैव यथार्थज्ञानबोधकसद्गुरुः प्राप्यते ।

[1] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम श्रीवासदुवे ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'यावन्न जायते साक्षादीश्वरात्समनग्रहः । सच्छास्त्र सद्गुरुश्चापि तावल्लभ्यः कुतो नृणाम् ॥' (द.प.१.३.३)

[2] तत्रैव, 'ईश्वराराधनधिया स्वधर्माचरणात्सताम । ईशप्रसादस्तद्रपः सलूभश्चात्र सद्गुरुः ॥' (द.प.१.३.४)

[3] तत्रैव, 'सद्गुरोः सम्प्रसादोऽस्य प्रतिबन्धक्षयस्ततः । दर्भावनातिरस्काराद्विज्ञांनु मक्तिंद क्षणात ॥' (द.प.१.३.५)

शाण्डिल्याथर्वसंवादः

वेदवेदाङ्गशास्त्रनिपुणः स्वाश्रमोचितनित्यनैमित्तिककर्मानुष्ठानपरः शाण्डिल्याख्यातः मन्त्रद्रष्टामहर्षीबभवू | श्लोके अथ शब्दः मङगल्आर्थवाचकः शुभङ्करः सकलार्थसाधकः भवति |[4] आत्यन्तिकाव्यभिचारभक्त्या ज्ञानगर्भवैराग्येन संन्यास्यदीक्षामाचरितः शाण्डिल्यः अथर्वणचरणौ नमस्कर्त्य 'हे भगवन् ब्रह्मविद्यां मामनुग्रहीतुं ब्रह्मविद्यां स्मारयेत्' इति प्रार्थयाञ्चकार[5] |

श्रीमद्दत्तात्रेयगुरुस्तुतिः

आदौ ज्ञानप्राप्तेः पश्चात्कतृपापनिवत्त्यृर्थमाजीवित वेदान्त-ईश्वर-गरूणा सेव्यमानमिति अथर्वण ऋषिः प्राह | श्रीमद्दत्तात्रेयेन अनुशासितवचनान्मनसि निधाय उपरोक्तत्रयाणामाजीवनं सेव्यमानेन सर्वसिद्धिं भवतीति अथर्वण महर्षी सम्यग्ज्ञात्वा श्रीदत्तमहात्म्यं कथयाञ्चकार |[6]

अजरामरः अन्नमयादिकोशाद्विलक्षणः त्रिकालातीतः बुद्धिगुणवत्तः आनन्दरूपः जगत्कारणः पापहारकः दहेत्रयातीतः इति श्रीमद्दत्तात्रेयस्य पादपद्मादतिरिक्तः नान्यत्किमप्यस्ति जगति | इत्यथर्वणमहर्षिः आदौ श्रीमद्दत्तात्रेय सर्वसाक्षिकं सर्वद्वैतभ्रमस्याधिष्ठानं परमान्दरूपं निरस्तसमस्तानर्थरूपं स्वप्रकाशचिद्रूपब्रह्माणं तुष्टाव | तेन ब्रह्म तथा विवर्तरूपेण स्थितजडप्रपञ्चस्यास्तित्वं रज्जुसर्पन्यायेन अध्यारोपापवादैः समानाधिकरणं सिद्ध्यते | तदा जीवब्रह्मक्यैज्ञानं स्वयेमवेत्पद्यते |[7]

---

[4] श्रीवासुदेव ानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासदुवे ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणेः श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'अथ शाण्डिल्यनामासीदब्रह्मषि्व महामुनिः | वेदवेदाग्डशास्त्रज्ञः स्वाश्रमोचितकर्मकृत् ||' (द.पु.१.६.२२)

[5] तत्रैव, 'विद्याप्राप्तिमथर्वाणमपुसत्रो महामतिम | सोऽविभाद्याह भगवन्ब्रह्मविद्यामधीहि मे ||' (द.प.१.६.२५)

[6] तत्रैव, 'आजीवित त्रयः सेव्या वेदान्तो गरूरीुश्वरः | पर्व ज्ञानाप्तये पश्चात्कतघ्नत्वनिवत्तये ||' (द.प.१.६.२)

[7] तत्रैव, 'तदजरामर कोशविलक्षण संदज श्रीगणवुेत कृलक्षणम | भ्वनहुत्वेघहृत्त्रिपराधिुक तवं न जात पद कुपुराधिकम् ||' (द.पु.१.६.१८)

ज्ञानगर्भवैराग्यः द्विविधमिति बुधाः मन्यन्ते | प्रथमः केवल दःखपरम्परया तथा च दःखभोगेनोत्पद्यते | द्वितीयस्त ईषणत्रयलोभनेोत्पद्यते अर्थात लोकेषण वित्तषेण पुत्रेषण एते लोभरहितत्वाद्वैराग्य जंन्यते | तर्केण स्वबदध्युभ्यूहमात्रेण ब्रह्मज्ञानं न सिध्यति | केवलमनुभवसिद्धाभदेदर्शी आचार्योपदेशनैवात्मज्ञानं लभ्यते |[8]गरुणा एव विद्याप्राप्तिर्भवतीति |[9]

सा विद्या अपरोक्षसाक्षात्कारलक्षणात्मका जीवब्रह्मक्यैप्रत्यक्षानुभवमेवइयं विद्या | ब्रह्मविद्यायाः अध्ययनाध्यापनान्यविद्याशिक्षणवन्नास्ति | [10] गरुणा केवलमात्मविद्यायाः स्मरणमात्रेण शिष्यस्य सन्दहेनिवत्तिृः कारयति | तस्मात शाण्डिल्यः अथर्वऋषीं स्वकृते आत्मविद्यां स्मारयत्विति प्रार्थयामास |

ईदृशः शिष्यशाण्डिल्येन यदा सस्पष्टः अथर्वमहायोगी प्राह | त्यागपर्वकू श्रद्धाभक्ति ध्यानयोगानुसारेण ब्रह्मविद्यायाः ज्ञानमत्पद्यते |[11]ब्रह्मविद्यायाः श्रवण संन्यासानन्तरमेव कुर्यादिति | संन्यासः द्विविधः प्रोक्तः विद्वत्संन्यासः विविदिषासंन्यासश्चेति | विद्वत्संन्यासे कर्मफलानासक्तिः विद्यते | यतः कर्मसंन्यासेन स्वस्वरूपज्ञानकाङ्क्षिणां मुमुक्षूणां ज्ञानलाभेत्यपेक्षाकारणात्तदसाधु | यथोचितकर्म अक्रियमाणऽेन्तःकरणशुद्धेरनुपपत्तिरपि | अतः ज्ञानोत्पत्तिरसम्भवम | तस्मात

[8] कठोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सज्ञुनाय प्रेष्ठ | या त्वमापः सत्यधृतिबतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा ||' (क.उप.१.२.९)

[9] छान्दोग्योपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'आचार्यवान्पुरुषो वेद' (छा.उप.६.१४.२),

[10] Swāmī Nikhilananda. (2010). दक्षिणामूर्तिस्तोत्रम्. New Delhi: Advaita Ashram, Uttarakhand. 'चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा |गरोस्तु मौन व्याख्यांन शिष्यास्त छिन्नंसशयाः ||'(द.स्तो.३)

[11] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ, 'इति शिष्येण सोऽथर्वा सस्पंष्टः प्राह सोम्य ताम | श्रद्धाभक्तिध्यानयोगादवेहि त्यागपूर्वकम् ||' (द.पु.१.६.२७)

कमर्त्यागापेक्षया कर्मफलत्यागः उत्कृष्टः इति सूचितः | स्मृतिवचनैः कर्मफ लत्यागं वर्णितम् |[12]

विदिताविदिताद्विलक्षणं ज्ञात्यादि त्रिपुटिवर्जितं स्वयम्प्रकाशरूपं ज्ञानलक्षणं ब्रह्मेति ज्ञातव्यम् |[13] इन्द्रियैर्यदवगम्यते तद्विदितम् | जाग्रदस्वप्नाद्विलक्षणमविदितम् | किन्तु विदिताविदिताद्विलक्षणं त्रिपुटी | ज्ञाता ज्ञान तथा त्रिपटेः विलक्षणमिति त्रिपुटीवर्जयेयुः | अर्थादपरोक्षेति ज्ञानलक्षणमस्ति | स्वयम्प्रकाशरूपमिति चिद्रूपम् | ज्ञानमेव सच्चिद्रूपमिति | चिदेव सत्तथा सदेव चिदिति ज्ञातव्यम् | सर्वात्मकः इति एकविभूत्याः अनन्तलक्षणम् | ब्रह्म देशकालवस्तुपरिच्छिन्नः |[14] स एकमेवाद्वितीयमखण्डं सजातीयादिभदेवर्जितमिति श्रुतिवाक्यम् |[15]

जगदुत्पत्तिस्थितिलयकारणम्

आत्मा अक्रियः अविकारी इति चेत् दृश्यमाननामरूपात्मकजगतः आरम्भकत्वमारोपयितुमसम्भवमेव | अपि च निरशंः अविकारी आत्मा जगतः परिणाममित्यनुपपत्तिः |[16]

---

[12] श्रीमद्भगवद्गीता, (२०१६\). Gorakhpur: Geeta Press, 'आरुरुक्षोमर्नुेर्योग कंर्म कारणमच्युते | योगारूढस्य तस्यैव शमः कारणमुच्यते ||' (भ.गी.६.३) 'अनाश्रितः कमर्फ लं कार्यं कर्म करोति यः | स सन्यासी च योगी च न निराग्निर्न चाक्रियः ||' (भ.गी.६.१), 'कर्मेन्द्रियाणि सम्यम्य य आस्ते मनसा स्म्रन | इन्द्रियार्थान्विमढात्मा मिथ्याचारः स उच्यते ||' (भ.गी.३.६)

[13] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलकुर्णी, नारायण पेठ, 'विदिताविदितान्यत्व त्रिपटीपरिवर्जितम | स्वयंप्रकाशरूपं तज्ज्ञानलक्ष्मास्य केवलम् ||' (द.प.१.६.२९)

[14] तत्रैव, 'देशतः कालवस्तुभ्यां परिच्छेदो यतोऽस्य नो | विभोरेकस्य चानन्तलक्ष्म सर्वात्मकस्य च ||' (द.प.१.६.३०)

[15] तत्रैव, 'सत्य ज्ञानमनन्त चेत्यक्तु तदब्रह्मलक्षणम | इदमके चाद्वितीयं यत्सदा भदेवर्जितम ||' (द.प.१.६.३१), तैत्तिरीयोपनिषत्, (२०१७). Gorakhpur: Geeta Press 'सत्यज्ञांनमनन्तमिति ब्रह्मलक्षणम (तै.उप.३.१.१), अरविन्दोपनिषत्. (n.d.). Retrieved from sanskritdocuments.org: www.sanskritdocuments.org 'ॐ। एकमेवाद्वितीयं ब्रह्म सदसद्रूपं सदसदतीतं नान्यत् किञ्चिदस्ति |' (अर.उप.१), छान्दोग्योपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'सेदवसौम्येदमग्र आसीदक्मेवाद्वितीयम् | तस्मादसतः सज्जायत |' (छा.उप.६.२.१)

[16] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ, 'जगदारम्भकत्व नो घटतेऽस्याक्रियस्य हि | परिणामोऽपि न सतो निंरशस्याविकारिण ||' (द.प.१.३.१०)

यथा कुलालः घटस्योपादानकारणं भवति तद्वत् सत् विश्वस्यारम्भकारणमिति वक्तुमयुक्तम् | कुलालसाम्येन आत्मनः सदधिष्ठानकारणात् निरंशत्वात्कार्यानुपपत्तिः | परिणामने विश्वं भवतीति परिणामकारणवादीनां कथनमप्ययुक्तमेव | क्षीरस्य परिणामः दधिः यतः क्षीरः तंदशेमव| किन्तु ब्रह्मा निंरशः एव | सतेः परिणाम विंश्वमिति मन्यमाने द्वत ै ापत्तिर्भवति | अर्थात स्‌द्विश्वस्योः समत्वमुपपद्यते | [17]तस्मादात्मा ऊणर्नाभिवत्स्वमायया जगतः उपादान तथां च निमित्तकारणमपि भवति | [18] इद ंदृश्यमान जंगत्त केुवल लीलास्वरूपमितिति श्रुतिवचनात् |[19]

यद्यपि आत्मा अविकारी तथापि एकदेश या स्वमायया जगदिद ंनिर्माति | अत्र एकदेशशब्दः मायार्थीति अभिप्रेतः | 'पादोऽस्य विश्वाभूतानि' (ऋ.१०.९०) इति पुरुषसूक्ते दर्शितत्वात् | अत्र ऊणर्नाभ्युदाहरणने जगदुपादाननिमित्तकारणयोरभिन्नत्वं दर्शय ति | [20]घटस्य उपादानकारण मंत्तिृका | कुलालः कुम्भस्य निमित्तकारणः | भासमानमिद जंगतः उपादानकारणमात्मा | आत्मा एकोऽपि अनादिमायाशक्तिवशात् बहवोरूपाः मिथ्याप्रपञ्चाः सर्जयति |

---

[17]श्रीमद्भगवद्गीता . (२०१६). Gorakhpur: Geeta Press, 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमच्यते | तस्मादेवं विदित्वैनं नानुसोचितुमर्हसि ||' (भ.गी.२.२५)

[18] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलकुर्णी, नारायण पेठ, 'सजतीव् तदात्मक ै : स्वैकाशंादणूर्नाभिवत | लीलाकैवल्यमस्येदं लोकवत्समदशिर्नः ||' (द.पु.१.३.१३)

[19] ब्रह्मसूत्र शाङ्करभाष्यम्. (2013). New Delhi: Motilal Banarassi Dass, Delhi, 'लोकुवत्त लीलाकैवल्यम' (ब्र.सू.२.१.३३)

[20] मुण्डकोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'यथोणर्नाभिः सजृते गह्णते च यथा पथृिव्यामोषधयः सम्भवन्ति | यथा सतः परुषुात केशलोमानि तथाऽक्षरात सम्भ्वतीह विश्वम ||' (म.ुउप.१.१.७), Swāmī Nikhilanaṅda. (2014). *Vedāṅtasāra Sadānaṅda Yogīndra Praṇita*. New Delhi: Advaita Ashram, Uttarakhand 'यथा लूता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानञ्च भवति ||' (वे.सा.५६)

प्रत्यक्षानुभवेनैव आत्मा एकमवे ाद्वितीयमिति ज्ञानमुत्पद्यते | [21] सद्गुरुकृपया एव अनुभवात्मकज्ञानोत्पत्तिः सम्भवति | इदमवे साक्षात्कारमिति बधुाः मन्यन्ते | ज्ञानोदये मिथ्याभ्रमविलीये केवलमात्मा अवशिष्यते |

इदं दृश्यमानं नामरूपात्मक जगदनादिमायवशाद्दर्पणे दृष्टप्रतिबिम्बवद्भासते किन्तु ज्ञानोत्तरे जीवः स्वमीश्वरेति अनुभवति [22] | ब्रह्मणः जगद्विलक्षणनेनापि कथमिदं जगद्भासते इति सन्दहेः विद्यते | अतः दर्पणदृष्टान्तः उदाहृतः | यथा दर्पणे दृश्यमान वस्तूनि दर्पणे सन्तीति अवगम्यते तथैव मायावशाद्दृश्यमाननामरूपात्मकमिदं जगत् सच्चिदानन्दपरमात्मनि भासते | अनादिमाययाकल्पितः जगतः स्वप्नवत् निवृत्तिर्भवितुमसम्भवम् | केवलं दवै योगेन वा आप्तयोगेन वा सद्गरोुः अनग्रुहणे ैव जगतः मिथ्याभ्रमस्य निवृत्तिर्भवति |[23,24]

सृष्टेः पूर्वं दृश्यमानप्रपञ्चमात्मेति मन्यमाने आत्मनः जगद्भावापत्तिरुत्पद्यते | तदा आत्मा विश्वस्य कथं कारणं भवति ? अस्य सन्दहेनिवृत्तिः श्रुतिवाक्यप्रमाणैः मायाश्रित आत्मनः कार्यमेवेति कथितः |[25]

आत्मनि अध्यारोपापवादने प्रपञ्चस्य अभावः सम्भवति | प्रपञ्चोपाशमे शान्तमैद्वत बन्धमोक्षस्यापि अभावः |[26] 'असर्पभतूाया रंज्जौ सर्पारोपवद्वस्तनूि अवस्त्वारोपः-

---

[21] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ, 'तथात्मनोऽनादिमायावेशोदक्य चाप्ययम् | मिथ्याभ्रम प्रबोधऽेयमेकः स्वात्मैव शिष्यते ||' (द.पु.१.३.१५)

[22] तत्रैव, 'भातीदं स्वान्तरादशर्दृश्यवन्मायया बहिः | स्वप्नवज्जातमिव तत्प्रबद्धः स शिवोऽस्म्यहम ||' (द.पु.१.३.१६)

[23] तत्रैव, 'एवं श्रद्धाभक्तियुक्तः संशयं यो विभावयेत् | देव सद्गुरुभक्तोऽस्य कुतोऽयं शिष्यते भ्रमः ||' (द.पु.१.३.१७), 'अनादिस्वप्नभ्रमोऽयं न स्वयं विनिवर्तते | किन्तु स्वदैवयोगाप्तपृदेवाचार्यप्रसादतः ||' (द.पु.१.३.१८)

[24] माण्डूक्योपनिषत्.गौडपादकारिका (२०१०). Gorakhpur: Geeta Press, 'अनादिमायया सप्तो ु यदा जीवः प्रबुध्यते | अजमनिद्रमस्वप्नमद्वैतंबुध्यते तदा ||' (गौ.का.१.१६)

[25] बृहदारण्यकोपनिषत्. (२०१७). Gorakhpur: Geeta Press ,'इन्द्रो मायाभिः पुरूरूप ईयते' (बृ.उप.२.५.१९), श्वेताश्वतरोपनिषत्. (२०११). Gorakhpur: Geeta Press , 'माया त प्रकंति विद्यान्मांयिन त महश्व ं ु े रम्' (श्वे.उप.४.१०)

[26] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पणुे: श्रीवामन दत्तात्रेय कलकुर्णी, नारायण पेठ, 'प्रपञ्चस्तदभावोऽस्मिन्नध्यारोपापवादतः | प्रपञ्चोपशमे शान्ते शिवेऽद्वैकथन्निवमौ ||' (द.पु.१.३.२६)

अध्यारोपः ||' (वे.सा.३२), 'वस्तु - सच्चिदानन्दमयं ब्रह्म, अज्ञानादिसकलजडसमूहोऽवस्तु ||'(वे.सा.३३), 'अपवादो नाम रज्जविवुर्तस्य सर्पस्य रज्जुमात्रवद्वस्तुविवर्तस्य अवस्तुनो अज्ञानादेः प्रपञ्चस्य वस्तमुात्रत्वम ||' (वे.सा.१३७) तस्माद् भासमानमिदं जगद्विवर्तैव | बन्धमोक्षौ तथा च जीवसर्वेश्वरभिदावपि विवर्त एव | [27]ईदृशः ज्ञानेन जीवः जीवन्मक्तो भविष्यति | [28] जीवन्मुक्तः जगति बालोन्मत्तपिशाचवत्सञ्चरति | यद्यपि प्रारब्धकर्मानाचरति किन्तु ताभ्यामलिप्तः भवति | स्वात्मानन्दे रमति[29]|

तत्त्वम्पदलक्षणम्

तच्छद्वलक्ष्यः ब्रह्माणं दर्शयति | इदं जगत्तु ब्रह्मणि ओतं प्रोतं च तदाश्रित्म[30]| कथमेकविज्ञानेन सर्वविज्ञान ज्ञात भंवति इतिसन्देहः अस्ति चत ` ् 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (ब्र.स.ू१.४.२३) इति श्रतिवुचनेन प्रतिज्ञादृष्टान्तयोः अनुपरोधनेदं प्रतिपादनं दृढीकृतः | तत्त्वमसि इति महावाक्ये तत्पदः ब्रह्माणं दर्शयति अतः तत् ब्रह्मवाचकशब्दः | तत् त्वं इति पदद्वयस्य अभदेदशर्नार्थम इद्म इति शब्दने समानाधिकरण्यं कथितः |[31]तथैव एकस्य ब्रह्मणः ज्ञानेन सर्व विदित भंवति तथा न

[27]तत्रैव, 'बन्धमोक्षौ तथा जीवसर्वेश्वरभिदावपि | कोशपोधिपरित्यागान्न जीवो नापि चश्वर|' (द.पु.१.३.२७)

[28] तत्रैव, 'स्वस्वरूपे परिज्ञाते न बन्धो नापि मोक्षणम् | बन्धमोक्षप्रकारं ते वक्ष्ये सङ्क्षेपतः श्रृणु ||' (द.पु.१.३.२८), माण्डूक्योपनिषत्.गौडपादकारिका (२०१०). Gorakhpur: Geeta Press, 'न निरोधो न चोत्पात्तिर्न बद्धो न च साधकः | न मुमुक्षुर्न वा मुक्त इत्येषा परमार्थता ||' (गौ.का.२.३२)

[29] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेवानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ, 'दक्षोज्ञोऽप्यन्यदृष्ट्या तु बालोन्मत्तजडोपमः | तिष्ठत्येव स्वरूपे स दिवि भिन्नघटाभवत् ||' (दु.प.१.३.४०)

[30] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'तच्छब्दलक्ष्येऽस्मिन्नोत प्रोतं चत ं ै त्तदाश्रयम् | यस्मिञ्ज्ञाते सर्वमिदं विज्ञातं भवति ध्रुवम् ||' (द.पु.१.६.३२), छान्दोग्योपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातँस्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् |' (छा.उप.६.१.४)

[31] Swāmī Nikhilananda. (2014). Vedāntasāra Sadānanda Yogīndra Praṇita. New Delhi: Advaita Ashram, Uttarakhand, 'समानाधिकरण्यसम्बन्धः तावत यथा सोऽय दव ं ` दत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचक स शब्दस्यैतत्कालविषिष्टदेवदत्तवचक अयं शब्दस्य च एकस्मिन्पिण्डे तात्पर्यसम्बन्धः | तथा चस तत्त्वमसि वाक्येऽपि परोक्षत्वादि विशिष्टचतै न्य वाचक तत्पदस्य अपरोक्षत्वादि विशिष्टचैत न्यवाचक त्वम्पदस्य च एकस्मिन्चैतन्ये तात्पर्यसंबन्धः |' (वे.सा.१५१)

अन्यज्ञानस्य वेद्यमिति |

जीवब्रह्मक्यैसिद्धेः अभिन्ननिमित्तोपादानत्वमर्थात् प्रकृत्यधिष्टातयोः ऐक्यं वर्णयति | यतः अत्र निमित्तोपादानकारणयोरभिन्नत्वं प्रतिपादितः[32,33] | परब्रह्म अन्तर्यामी मायावी आत्मा तच्छब्दवाचकः | स कामादिकैर्दूषितः अस्मप्रत्ययस्य अधिष्ठानः[34] |

आकाशवत्सर्वव्यापी अद्वितीयः मायावरणशून्यः सद्रूपः[35] प्राणादिकलासहितः[36] शान्तः प्रत्यादिप्रमाणैः अप्रेमयः जन्मादिविकारहितः कल्याणमयः इति स परब्रह्माणं वर्णयति | अतः प्रत्यक्परोक्षादिकानां विरोधं त्यक्त्वा तत्त्वम्पदार्थयोरखण्डैक्यज्ञानेन शुद्धचिदात्मनस्यानुभवं सिद्ध्यते[37] | येन बुद्धिवृत्तिव्याप्तफलनिवारणने चित्तैकाग्रं साधयति श्रवणमनननिदिध्यासनैः स्वात्मानं जानाति स मुक्तोभूत्वा कृतकृत्यो भवति |

---

[32] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलकुर्णी, नारायण पेठ, 'अस्याभिन्ननिमित्तोपादानत्व चक्यैसिद्धये | प्रकृत्यधिष्ठात्रैक्यं च प्रतिज्ञातमनेन हि ||' (द.ु प.१.६.३३)

[33] तैत्तिरीयोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'इद सर्वमंसजत' (तै.उ्प.२.६.१), 'तदात्मान स्वयमकुरुत' (तै.उप.२.७.१) तत्सृष्टया तेदवनुप्राविशत' (तै.उप.२.६.१)

[34] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'अन्तर्यामी च मायावी स त तच्छुब्द वाचकः | योऽस्मतप्रत्ययशब्दाभ्यालम्बः कामादिदूषकः ||' (द.ु प.१.६.३७)

[35] तत्रैव, 'तद्वयोमवत्सर्वगतमद्वितीय ंनिरञ्जनम | सन्मात्र निष्कल शांन्तमप्रमय े मजं शिवम् ||' (द.प.ु१.६.३८)

[36] प्रश्नोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'स प्राणमृसजत प्राणाच्छ्रंद्धां ख वायज्योर्तिरापृः पथिवीन्द्रिय मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेष चु नाम च |' (प्र.उप.६.४), 'इहव ै न्तःशरीरे सोम्य स परुषो यस्मिन्नेताः षोडशकलाः प्रभवन्तीति | (प्र.उप.६.२)

[37] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ, 'प्रत्यक्परोक्षादिवैरं तयोहिर्त्वा चिदात्मताम् | गृहीत्वा लक्षितां शुद्धां भूमक्यैज्ञानतो भवेत् ||' (द.ु प.१.६.४१)

अतः हे सौम्य त्वमपि आत्मज्ञानसाक्षात्कारेण शोकमुक्तो भविष्यतीति अथर्व ऋषिः शाण्डिल्यमाशासीत | अत्र श्रुतिवचनैः चित्तैकाग्र्यसाधनं सूचयति |[38,39]

अथाष्टाङ्गयोगज्ञानम्

शोकं त्यक्त्वा श्रद्धया शृणु इति अथर्वयति शाण्डिल्यं कथयन् तथा च येन मनःप्रसादं सिध्यति तत्पातञ्जलाष्टाङगयोग बोधयति | जीवब्रह्मैक्य ज्ञात पातञ्जलाष्टाङ्गयोगस्य अष्टान्यङ्गानि भवन्ति | दहेन्द्रियादीना मिंथ्यात्वज्ञानेन वैराग्यमुत्पद्यते तद् यमः |[40] ब्रह्मणः सत्यत्वं निर्धारित्य स्वात्म्याविषये तात्त्विकप्रेमैव नियमः | शब्दादिविषयेषु औदासीन्युमत्पादयन् अन्तदृष्टिस्थापनेनैव स्थिरासनम्[41] |

प्राणायामः इति चतुर्थः अङ्गम् | तस्य त्रीणि प्रकाराणि सन्ति | वस्तुयान्वयं साधयन् आत्मतत्त्वस्य ग्रहणमवे पूरकः | ईदृक गृहीतात्मतत्त्वस्य स्थिरीकरण कुम्भकम् | तथा मिथ्यात्मकनामरूपस्य वर्जनेमवरेचकः | इति त्रिविध प्राणायामः[42] |

---

38 तैत्तिरीयोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सः|' (तै.उप.२.४.१) बहृदारण्यकोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'मनसौवनदृष्टव्यम' (बृ.उप.४.४.१९), कठोपनिषत्. (२०१७). Gorakhpur: Geeta Press, 'एष सर्वेषु भतेूष गुढ़ूात्मा न प्रकाशते | दृश्यते त्वग्र्यया बुध्दया सूक्ष्मया सूक्ष्मदर्शिभिः |' (क.उप.१.३.१२) ,

39 श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'वाग्धीनिवत्यानृाप्त्या च फलव्याप्तिर्निवारिता | एवमात्मस्थमात्मानं योगेन श्रवणादिना ||' (द.प.१.६.४२), 'जानात्यैक्य स मंक्तः सुन्कतकत्योृ भवेद्धम || आत्मविज्ञानेन सोम्य शोकस्यान्तं गमिष्यसि ||' (द.पु.१.६.४३)

40 तत्रैव, 'योगः स्यात्प्रत्यगात्मक्यैमष्टावङ्गनि तस्य तु | दर्हेन्द्रियादौ विरक्तिर्यमो मिथ्यात्ववीक्षणात् ||' (द.पु.१.६.४५)

41 तत्रैव, 'स्वात्मतत्वेऽनुरक्तिर्नियमः सत्यत्वनिश्चयात् | बाह्यार्थोदासीन्यतोन्तदृष्टिस्थापनमासनम् ||' (द.पु.१.६.४६)

42 श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'परश्चिूदन्वयादान कंम्भुकस्तस्थिरीकतिृः | रेचको मायिकत्यागः प्राणायामस्त्रिधोदितः ||' (द.पु.१.६.४७)

इन्द्रियविषयग्रहणानासक्तिः एव प्रत्याहारः | असम्भवादि दर्भावनुाना नाशयन् स्वात्मनि दृढनिष्ठासाधनमेव धारणा |[43] मायामयविकाराणा त्यक्त्वा 'अह ब्रह्मास्मीति अन्तदृष्टेः प्रवाहसातत्यमव ध्यानम् |[44] दहोत्मवत् परमात्मनि सुस्थिरीकृतदृष्टिरेव समाधीः |[45] इति पातञ्जलयोगस्याष्टवङ्गानि भवन्ति |

इदं पातञ्जलयोगं परिपक्वकषायाणामर्थाद्रागादिदोषरहितानां तथा किञ्चित्पक्वकषायाणामपि अर्थात्किञ्चिदपि रागदोषादिवर्जितानामपि शीघ्रमुक्तिदः भवति |[46]

---

[43] तत्रव, 'प्रत्याहारो गोस्वभावदृष्ट्यार्थासक्त्यभावदृक् | धारणा स्वात्मनिष्ठा स्याहीतुदर्भावंन दृढा ||' (दु.प.१.६.४८), शाण्डिल्योपनिषत्. (n.d.). Retrieved from Sanskritdocuments.org: www.sanskritdocuments.org/upanishads, 'अथ प्रत्याहारः | स पञ्चविधः विषयेषु विचरतामिन्द्रियाणां बलादाहरंण प्रत्याहरः | यद्यत्पश्यति तत्सर्वमार्मेति प्रत्याहारः | नित्यविहितकर्मफलत्यागः प्रत्याहारः | सर्वविषयपराङ्मुखत्वं प्रत्याहारः |' (शा.उप.८), शाण्डिल्योपनिषत्. (n.d.). Retrieved from Sanskritdocuments.org: www.sanskritdocuments.org/upanishads, 'अथ धारणा | सा त्रिविधा । आत्मनि मनोधारण दंहराकाशे बाह्याकाशधारण पथिव्यप्तेजोवाय्वाकाशषे पञ्चमर्तिधूारण चेति ||' (शा.उप.९)

[44] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलुकर्णी, नारायण पेठ, 'ध्यान ब्रह्मांहमस्मीति दृक्प्रवाहोऽन्यवर्जनात | दहोत्मवत्परात्मत्वदृक् समाधिर्हि सुस्थिरा ||' (द.प.१.६.४९), शाण्डिल्योपनिषत. (n.d.). Retrieved from Sanskritdocuments.org: www.sanskritdocuments.org/upanishads, 'अथ ध्यानम् । तद्द्विविधं सुगणं निर्गुणं चेति । सुगणं मूर्तिध्यानम् | निुर्गणमात्मयाथात्म्यम ||' (शा.उप.१०)

[45] शाण्डिल्योपनिषत्. (n.d.). Retrieved from Sanskritdocuments.org: ww.sanskritdocuments.org/upanishads, 'अथ समाधिः | जीवात्मपरमात्मक्यावस्थात्रिपुटीरहिता परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति ||' (शा.उप.११)

[46] श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). श्रीदत्तपुराणम् श्रीवासुदेव ानन्दसरस्वतीतेम्बेस्वामीकृत सटीकम् (संस्कृतम्). पुणे: श्रीवामन दत्तात्रेय कलकुर्णी, नारायण पेठ, 'परिपक्वकषायाणा योगोऽयं शीघ्रमक्तिदः | किञ्चित्पक्वकषायाणां योगोऽयं शीघ्रमुक्तिदः ||' (दु.प.१.६.५०)

उपसंहारः

यथा समुद्रे स्थित मकरवद्रागलोभमोहाकृष्टः जीवः नानामर्त्ययोनौ सञ्चरन् त्रस्थः दैव योगेन उत्तम ब्राह्मण जन्मः सम्प्राप्यति | उत्तमजन्मप्राप्त्यानान्तर कंथ किमाचरणने जीवन्मुक्तः भवतीति सन्देहे इंद विद्यते |

दैवयोगेन उत्तमजन्मप्राप्तजीवः वर्णाश्रमधर्मानुसारेण अध्ययनाध्यापन यजन याजन दान प्रतिग्रह इति वेदविहित नित्यनैमित्तिककर्मानिष्ठानेन ईश्वरार्पणबदध्या् चित्तशुद्धीकारयेत् | ऐहिकामुष्मिकफलापेक्षारहितः वैराग्येण जीवब्रह्मात्मक्यैज्ञान प्राप्तुं सद्गुरुं शरणं व्रजेत् | सद्गुरूपदीष्ट महावाक्यश्रवणमननिदिध्यासनैः ज्ञानप्रतिबन्धक त्रिविधतापाः अर्थादध्यात्मिकाधिदैविकाधिभौतिकेभ्यो विमक्तो भवति | ईदृक् मुमुक्षुः जीवन्मक्तो भवति |

विनाज्ञानं मोक्षप्राप्तिरसम्भवम् | विना सद्गुरोरनुग्रहेण ज्ञानप्राप्तिरसम्भवम् | ईश्वरकृपाप्रसादं विना सद्गुरुप्राप्तिः न भवति | परमश्व रानुग्रहार्थं चित्तशुद्धिः प्राप्तुं नित्यनैमित्तिका वेदविहित स्वधर्मानुष्ठानमाचरेयुः |

सन्दर्भसूची |

Swāmī Mādhavānanda. (2010). Minor Upanishads. New Delhi: Advaita Ashram, Uttarakhand.

Swāmī Nikhilānanda. (2010). *दक्षिणामूर्तिस्तोत्रम्.* New Delhi: Advaita Ashram, Uttarakhand.

Swāmī Nikhilananda. (2014). Vedāntasāra Sadānanda Yogīndra Praṇīta. New Delhi: Advaita Ashram, Uttarakhand.

अरविन्दोपनिषत्. (n.d.). Retrieved from sanskritdocuments.org: https://sanskritdocuments.org/doc_upanishat/aravindopanishad.html

कठोपनिषत्. (२०१७). Gorakhpur: Geeta Press.

छान्दोग्योपनिषत्. (२०१७). Gorakhpur: Geeta Press.

तैत्तिरीयोपनिषत्. (२०१७). Gorakhpur: Geeta Press.

प्रश्नोपनिषत्. (२०१७). Gorakhpur: Geeta Press.

बृहदारण्यकोपनिषत्. (२०१७). Gorakhpur: Geeta Press.

ब्रह्मसूत्र शाङ्करभाष्यम्. (2013). New Delhi: Motilal Banarassi Dass, Delhi.

माण्डूक्योपनिषत्.गौडपादकारिका. (२०१०). Gorakhpur: Geeta Press.

मुण्डकोपनिषत्. (२०१७). Gorakhpur: Geeta Press.

वेदान्त दर्शन. (२०१६). Gorakhpur: Geeta Press.

शाण्डिल्योपनिषत्. (n.d.). Retrieved from Sanskritdocuments.org: https://sanskritdocuments.org/doc_upanishat/shandilyopanishad.htmlश्रीमद्भगवद्गीता. (२०१६). Gorakhpur: Geeta Press.

श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामी. (१९५४). *श्रीदत्तपुराणम् श्रीवासुदेवानन्दसरस्वतीटेम्बेस्वामीकृत सटीकम् (संस्कृतम्).* पुणे: श्रीवामन दत्तात्रेय कुलकर्णी, नारायण पेठ.

श्वेताश्वतरोपनिषद्. (२०११). Gorakhpur: Geeta Press.

पाणिनीयनये अपादानतत्त्वविमर्शः

डॉ. अभिमन्युः

संस्कृतव्याकरणे वाक्यस्य अर्थावबोधकत्वानामनुसन्धानक्रमे कारकप्रकरणे विचारः कृतः अस्ति। वाक्ये कर्तृक्रिययोः सम्बन्धावधारकत्त्व कारकत्वेन निरूपित तंत्र। वस्ततः क्रियानिष्पत्तेः साधिका शक्तिर्हि क्वचित् साधनत्वेनोक्ता कारकमिति व्यपदिश्यते-

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे। क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः॥[1]

वाक्ये क्रियैव कारकनिर्णयस्य आधारः भवति। तस्याः क्रियायाःव्यापाराश्रयःस्वातन्त्र्येणान्वितः कर्ता उच्यते। फलाश्रयश्च कर्म भवति। क्रियायाः सिद्धये यत् साधकतमं भवति तत् करणम् आधारश्चाधिकरणम्। कारकता एव कारकत्वस्य निर्धारिका भवति। अत एव कर्ता, कर्म, अधिकरणम्, करणम्, सम्प्रदानम्, अपादानम इति प्रतिपादनस्य क्रमे आद्याश्चत्वारः क्रियार्थकात् 'कृ' धातोर्निष्पद्यन्ते। तत्र क्रियायाः प्रथमादारभ्य अधिकतरं कारकत्वं दृश्यते। शिष्टयोस्तु व्युत्पत्तिः कृधातोर्नास्ति अतस्तत्र च न्यून कारकत्वम। आष्टाध्याय्यां विप्रतिषेधे परं कार्यम् इति सूत्रानुसारं 'गरीयो यद् युदत्तरम्' इति न्यायेन कारकाणां स्थापना कृता अस्ति। अर्थात् आदावपादनम् ततः क्रमशः सम्प्रदानम्, करणम्, अधिकरणम्, कर्म, कर्ता चेति। प्रकृतस्थले अपानकारके एवं सक्षेपेण विमर्शः क्रियते।

पाणिनिः ध्रुवमपायेऽपादानमि'ति[2] अपादानकारकं लक्षयति। केषाञ्चन अवशिष्टप्रयोगाणां साधनाय इतराण्यपि सप्तसत्राणि प्रणिनाय। 'भीत्रार्थाना भयहेतुः', 'पराजेरसोढः', 'वारणार्थानामीप्सितः', 'अन्तर्धौ येनादर्शनमिच्छति', 'आख्यातोपयोगे', 'जनिकर्तुः प्रकृतिः', 'भुवः प्रभवः', इति एतदुनसारेमस्ति।[3]

कात्यायनोऽपि वार्तिकेनैकेन पाणिनीयं विवरणं समर्थयति- 'जुगुप्साविरामप्रमादार्थानाम् उपसंख्यानम्' इति।[4]

---

[1] वा. प. साधनसमुद्देश, ३६

[2] पा.सू.१/४/२४

[3] पा.सू.१/४/२५-३१

[4] महाभाष्यम्, पृ.२४८.

पतञ्जलि: पाणिनीयलक्षणोक्तध्रौव्य विमर्शय ति।[5] तदनसुार ध्रौव्येण न केवल स्थिरवस्तूनाम् अपितु गतिशीलानामपि ग्रहणं भवति यथा धावतोऽश्वात पतति'। भाष्यकार: तर्कपूर्वकम् इदम् अपादानस्य उदाहरणं प्रतिपादयति। यतो अश्वगतम् अश्वत्वं स्थिरमेव अस्ति अश्वत्वरूपसामान्यं च ध्रुवं सत् अपादानं भवेदिति। अन्यैरपि उदाहरणै: असौ स्वमंत पोषयति- 'अश्वात् त्रस्तात् पतित:', रथात् प्रवीतात् पतित:','सार्थाद गच्छतो हीन:' इत्यादिष अपि सामान्ये एवम् अपादानत्वमिति। तत्र अश्वे अश्वत्वम, आशगामित्व वां सामान्यम, रथे तोष्टत्वम, सार्थेऽपि सार्थत्वम्।[6] एवमेव ध्रौव्ये योग: इति।[7]

अपायेनापि द्विविध: पृथग्भाव: स्वीक्रियते भाष्यकृता-वास्तव: मानसञ्चेति। अनेन च 'भीत्रार्थाना भयहते:', 'पराजेरसोढ:', 'वारणार्थानामीप्सित:' इत्यादीनाम उदाहरणषे मानसापायस्य उपस्थिते: ध्रवुमपाये इत्यादिसत्रेूणवै अपादानं प्रतिपद्यते अत: उक्तसत्राूणि व्यर्थानि सन्ति इति रूपेण स्वीकृति:। यथा 'भीत्रार्थाना भयंहते: इत्यस्योदाहरणे 'वकेभ्यो बिभेति' 'चौरेभ्यस्त्रायते' अत्र मानसोऽपाय: उच्यते वकृेभ्य: चोरेभ्यश्च कर्त:। अपादानत्वञ्च मुख्यसूत्रेणैव उक्तं स्यात् अत: नात्र पथ्क सत्रमावश्यकमिति।[8]

'पराजेरसोढ:' इत्यस्यापि वैय्यर्थ्यं प्रादर्शयत् भाष्यकार:। 'अध्ययनात् पराजयते' अत्र वाक्ये अध्ययनात मानसावायात कर्त: नेदमपि सत्रमावश्यकमिति।[9] तथैव 'अन्तर्धौ येनादशर्नमिच्छति' अस्योदाहरणे 'उपाध्यायादन्तर्धत्ते' इति वाक्ये कर्त: उपाध्यायात मानसोऽपाय: विवक्ष्यते। अत एव मख्युसत्रैव अपादानसञ्ज्ञाऽऽपद्येत न पन: पथुक सूत्र कर्तुमावश्यकम्। 'वारणार्थानामीप्सित:' अत्र च प्रयोगे 'माषभ्यो गा वांरयति' इति वाक्ये। माषभ्य: गो: अपाय: कर्त: मनसि बिम्बित: भवति। अत: मख्युसत्रोक्त लक्षणमत्र प्रवर्तते न पृथग्लक्षणपेक्ष्यते।[10] आख्यातोपयोगे' इत्यत्रापि उपाध्यायात् वस्तुत:[11] निर्गत्य ज्ञानं अध्येतरि अस्याशय: उक्त: भवति न कुर्तमावश्यकं पथ्क सूत्रयितमिति।[12]

---

[5] इदं तर्हि वृक्षस्य पर्णं पतति, कुड्यस्य पिण्डं पतति, महाभाष्यम्, पृ.२४७.
[6] इह तावत् अश्वात् त्रस्तात् पतति इति यत् तद् अश्वस्य अश्वत्वम्.........तद् ध्रुवं विवक्षितम्। तत्रैव, पृ.२४९.
[7] तत्रैव, पृ.२४९.
[8] तत्रैव, पृ.२५०
[9] तत्रैव, पृ.२५०-२५१.
[10] तत्रैव, पृ.२५१-२५२
[11] तत्रैव, पृ.२५२-२५३
[12] कथम्? उपाध्यायात् अधीयते इति, उपक्रमति तस्माद् अध्ययनम्.........सन्ततत्वात् अथवा ज्योतिर्विज्ञानानि भवन्ति, तत्रैव, पृ.२५४

'जनिकर्त: प्रकृति:', 'भव: प्रभव:' इत्यनयो: उदाहरणे 'गोमयाद वश्चिको जायते', 'गोलोमाविलोमभ्यो दूर्वा जायते' 'हिमवतो गंगा प्रभवति' इत्यादिषु वास्तविकोऽपाय: लक्ष्यते अत: नात्र आवश्यकं सूत्रयितुमिति। यत्र च कार्यकारणयो: अपाय: न शक्य: यथा-'दग्धात् दधि भवति' तेषां प्रयोगाणां साधुत्वाय पृथग्लक्षणमसौ करोति- 'अथवान्याश्चान्याश्च प्रादुर्भवं ति'[13] एतदनुसारम्। ईदृश: कार्यकारणयो: पथग्भाव: बौद्धाना क्षणिकंवादस्य, साख्याना सत्कार्यवादस्य, वैशेषिकाणाञ्च आरम्भवादस्य सन्दभेंऽपि विवेचित: भवति।

हिमवत: गगा सातत्येन प्रवहति अत: तस्या: पथग्भाव: नास्ति इत्यपि एकेषा मतं विवृण्वान: भाष्यकार: जलाना प्रतिक्षणम अपाय गंत्वा इदम अपादानस्य स्फटमदाहरण प्रतिपादयति।[14] न कश्चिदपि समाना नदीं द्विधा प्रविशतीति पाश्चात्य (ग्रीक) विदष: मतमपि पतञ्जले: सिद्धान्तं समर्थयति।

जुगुप्साविरामप्रमादार्थानाम् उपसंख्यानम्' इति कात्यायनस्य वार्तिकमपि भाष्यकार: अनावश्यकं प्रतिपादयति। 'धर्माद् विरमति' 'अधर्मात प्रमाद्यति' इत्यादिष धर्माधमर्य ो: कर्तु: मानसिकापायात्। मुख्येन अपादानसूत्रेणैव अपादानमुक्तं भवति।[15] तथैव हि 'संकाश्यकेभ्य: पाटलिपुत्रका: अभिरूपतरा:' ईदृशतुलनात्मकवाक्येषु अपि तुलिताभ्याम् अन्यतरात् अन्यस्य अपाय: उच्यते वक्तुमर्नसि। अत एव पञ्चमीविभक्ते: इत्यपि संत्र नावश्यकम्।[16] नैय्यायिकानाम्, बौद्धानां च क्षणिकवादिनां परोक्षसन्दर्भेण भाष्यकार: 'आसनात् प्रेक्षति' इत्यत्रापि चक्षुरिन्द्रिये आसने च अपायस्य बोधात अयमपि प्रयोग: मख्योऽपादानप्रसङग नात्र 'पञ्चमीविधाने ल्यब्लोपे कमर्ण्युपसंख्यानम्' वार्तिकमावश्यकमिति।[17]

कैय्यट: पाणिनीये अपादानलक्षणे सयक्तिक व्याख्यांन प्रस्तौति। तस्यानसार 'ध्रुवमपायेऽपादानम्' अस्य 'यत्तदश्वे अश्वत्वम् आशुगामित्व तदध्रुव तंच्च विवक्षितम' इत्यभिप्राय:।[18] 'आख्यातोपयोगे' अस्य च 'ज्ञातत्वाज्ज्ञानानि भवन्ति इतिवत।[19] 'जनिकर्तु:

[13] तत्रैव, पृ.२५५

[14] उपक्रमन्ति.....अथवान्यश्चान्यस्य प्रादुर्भवन्ति, तत्रैव, पृ.२५५

[15] तत्रैव, पृ.२४८

[16] इह च संकाश्यकेभ्य:........एतत् प्रयुंक्ते, तत्रैव, पृ.२४८

[17] अपादानम् इत्येव सिद्धम्.......अन्यश्चान्यस्य प्रादुर्भवन्ति, तत्रैव, पृ.५०५, २/३/२८ पा.सूत्रे

[18] अयमर्थ; व्युत्पत्तिमात्रम्.......अश्वत्वमेवोच्यन्ते। तत्रैव, पृ.२४९

[19] शब्दस्य व्यञ्जका.....सन्ततान्युच्यन्ते। तत्रैव, पृ.२४९

प्रकृति:' अस्यापि अथवा 'अन्यश्चान्यस्य प्रादुर्भव न्ति' इत्येवम् अभिप्राय: भवति।[20] ध्रुवशब्दे कैय्यटस्य विवरणम् भर्तृहरे: समानम् अस्ति किन्तु प्राय: पतञ्जलेरनभिप्रैतम्।[21]

भर्तृहरिणा वाक्यपदीये प्रतिपादितान् एव कैय्यटोऽपि स्वीकरोति।[22] 'वारणार्थानामीप्सित' इत्यत्र असौ ईप्सितशब्दस्य व्युत्पत्तिभिन्नमर्थं स्वीकरोति पतञ्जले: सन्दभण ।[23] भर्तृहरि: 'ध्रुवमपायेऽपादानमि'त्यत्र पतञ्जलिना स्वीकृतमिव स्थिरे चले च उभयत्र ध्रौव्यं स्वीकरोति। ध्रुवञ्च अपाये वियोगजनकव्यापारस्याश्रय: भवति।[24] असौ च ध्रुवस्य अर्थे अवधिसंज्ञामपि पृथक् प्रतिपादयति। ध्रुवं भयूोऽपि स्पष्टीकर्वुन भर्तहृरि: धावन्त तिष्ठन्तञ्च अश्वमवधित्वेन निरूपयति। यदा आरोही अश्वात् पतति चेत् अश्व: धावन् तिष्ठन् वाऽपि सन् ध्रुव: भवति किन्तु अश्वारोहिणौ अभावपि यदा कुड्या: पतत: चेत्त्कुडी ध्रुवा। द्वयो: वस्तुनो: मिथ: सापेक्ष्ंय ध्रौव्ंय भवति।[25] तत्र प्रसङ्गे वक्तुर्विवक्षैव ध्रौवस्य निर्धारकतत्वं भवति।[26] भर्तृहरि: अपायेऽपि द्वैविध्यं पतञ्जलिसम्मतं स्वीकरोति। तद्धि वास्तविकं मानसञ्च। अनेनासौ मानसापायसम्बन्धीनि 'भीत्रार्थानां भयहतेु:', 'पराजेरसोढ:', 'पञ्चमी विभक्ते'रित्यादीनि सूत्राणि व्याचष्टे।[27]

पतञ्जलेरुदाहरणषेु 'बलाहको विद्योतते', 'बलाहके विद्योतते', 'बलाहकाद् विद्योतते' इत्यादिषु विभक्तीनामर्थभदें स्पष्टतया विवृणोति भर्तृहरि:।[28] तथाहि 'साधकतमं करणमि'त्यत्र 'धनुषा विध्यति' 'धनुर्विध्यति' इति उदाहरणयो: धनुषि स्थिंत शक्तिद्वंय क्रमश: उंक्त भवति। इति भर्तृहरे: स्थापना।[29] अपादानमसौ निर्दिष्टविषयम्', उपात्तविषयम्', अपेक्षितक्रियञ्चे'ति त्रिधा विभनक्ति।[30]

हल ाराज: ध्रुवमपायेऽपादानमित्यत्र ध्रौव्यमधिकृत्य भर्तृहरे: व्याख्यानं सोदाहरणं

[20] क्षणिकपक्षं द्रव्यान्तरारम्भापेक्षं वा परिणामापेक्षं वा आश्रित्यैतदुक्तम्.........कारकरूपोपगमात्। तत्रैव, पृ.२५५

[21] ततो अपाये यद् अनाविष्टं तद् अपाये ध्रुवमुच्यते, तत्रैव, पृ.२४०

[22] तत्रैव, पृ.२४८

[23] ईप्सितशब्द: क्रियाशब्दमाश्रीयते न तु रूढिशब्द:, तत्रैव, पृ.२५१

[24] अपाये यद् उदासीनं चलं वा यदि वा चलम्। एवातदावेशात् तदपादानमुच्यते॥ वाक्यपदीयम्, सा.१४०

[25] पततो ध्रुव एवाश्वो.......अवधित्वं पृथक् पृथक्, तत्रैव, सा. १४१

[26] तत्रैव. सा. १३९

[27] तत्रैव सा. १४७

[28] तत्रैव सा. १४६

[29] तत्रैव सा. १४५

[30] तत्रैव सा.१३६

विशदयति।[31] अपादानभदेनापि स: उदाहरणै: स्पष्टीकरणं करोति। यथा- 'ग्राम्राद आगच्छति' इद निदिर्ष्टविषयमपादानम्। 'बलाहकात विद्योतते' इद च उंपात्तविषयमपादानम। 'मथरा: पाटलिपुत्रकेभ्य आढ्यतरा:' अत्र अपायप्रतिपादिकाया: क्रियाया: अभावो लक्ष्यते अत: अपेक्षितक्रियमपादानमिदम्।[32] 'निर्धारणे विभक्ते: य:' इति कारिकाव्याख्याने हल राज: अपेक्षितक्रियमपादानं[33] मानसमपादानञ्च सयुक्तिकं स्पष्टयति।[34]

वत्तिकार: अपादानकारकविवरणे भाष्यप्रत्याख्याने सर्वाणि अपि अपादाने पाणिनीयसूत्राणि आवश्यकानि स्वीकरोति उदाहरणै: स्पष्टयत्यपि।[35] 'जनिकर्तु: प्रकृति'रित्यत्र प्रकृतिं हतुेत्वेन निर्दिशत्यसौ।[36] पतञ्जलिस्तु प्रकृतिमुपादानकारणं प्रतिपादयति।[37]

जिनेन्द्रबद्धि: अपादानकारके पतञ्जले: व्याख्यान स्वीकरोति किन्त तत्र पाणिने: सर्वाण्यपि सूत्राणि आवश्यकानि मनुते। तदनुसारम् आचार्य इमानि सूत्राणि उक्त्वा अपादानस्य सर्वसंभवां कल्पनां निरूपयतीति। 'अन्तर्धौ येनादशर्नमिच्छती'त्यत्र असौ सप्तम्या: अर्थं निमिंत्त विवृणोति।[38] तथैव 'जनिकर्तु: प्रकृति'इत्यत्र प्रकृतिपदने उपादाननिमित्तोभयकारणयो: ग्रहण स्वीकरोति। यथा 'पुत्रात् प्रमोदो जायते' इत्यत्र पत्र: निमित्तकारणमस्ति।[39]

हरदत्त: जिनेन्द्रबुद्धे: प्रतिपादनानि स्वीकुर्वाणोऽपि[40] 'अन्तर्धौ येनादशर्नमिच्छती'त्यत्र सप्तम्या: अर्थं निमित्तं न मनुते अपितु विषयसप्तमीं सति सप्तमीं वा स्वीकरोति।[41]

पुरुषोत्तम: अपादानकारके पाणिनीयलक्षणानि यथावत स्वीकरोति।[42] भर्तृहरे:

---

[31] तत्रैव, पृ.३४०-३४१

[32] तत्रैव, पृ.३३६

[33] तत्रैव, पृ.३४५

[34] तत्रैव, पृ.३४५

[35] काशिका, पृ.५३५-५४५

[36] तत्रैव, वृ.५४४

[37] तस्मात् पूर्वस्यायं प्रपञ्च: एवम् एवम् उत्तरेऽपि योग: पूर्वस्यैव वेदितव्य:। तत्रैव, १/४/२५ पा.सूत्रे, पृ.५३९

[38] अन्तर्धाविति निमित्तसप्तम्या, तत्रैव, पृ.५४१

[39] अथ प्रकृतिग्रहणं किमर्थम्............प्रकृतिग्रहणे तु सति सर्वस्यैव कारणमात्रस्य भवति, तत्रैव, पृ.५४४

[40] पूर्वस्यां प्रपञ्च:,,,,,,तत्रैव, १/४/२५ सूत्रे, पृ.५३८, अयमपि प्रपञ्चो....सिद्धम्, तत्रैव, १/४/२७ सूत्रे, पृ.५४०, अयमपि प्रपञ्च:, तत्रैव, १/४/२८ सूत्रे, पृ.५४२

[41] नायं निमित्तात् कर्मयोगे इति सप्तमी.......विषयसप्तम्येषा, सति सप्तमी वा, तत्रैव, पृ.५४१

[42] भाषावृत्ति, पृ.४२

अनुकरणने चास्य त्रैविध्यमपि विवृणोति-निदिर्ष्टविषयम्, उपात्तविषयम्, अपेक्षितक्रियञ्च।[43] सृष्टिधराचार्या: अपादाने पाणिनीयसत्राूणि विस्तरेण विवण्वन्ति।[44] किन्तु विवरणे तै: किञ्चिदपि मौलिकचिन्तनं नो प्रस्तूयते। रामचन्द्राचार्योऽपि अपादाने भाष्यकारमतमनादृत्य सूत्रकारवार्तिककारयो: सर्वाण्यपि लक्षणानि यथावत स्वीकरोति।[45] उदाहरणैश्च स्पष्टयति। विट्ठलाचार्य: अपि पाणिनि-कात्यायनयो: मतमेव स्वीकृत्य तत्र विस्तृतं व्याख्यानं प्रस्तौति। जिनेन्द्रबुद्धे: भर्तृहरेश्च मतमपि स्वव्याख्याने स्पष्टीकरोती।[46]

भट्टोजिदीक्षित: अपादानकारक विंवणोति 'ध्रवमुपायेऽपादानमि'ति सत्रोल्लेखने। तदनुसारं यदा धातुना वस्तद्वये अपाय: उच्यते चते अपायस्याधार: अपादानं भवति किन्तु अपायविधायकव्यापारस्य आधार: अधिकरणं न भवति। यथा 'वृक्षात् पर्णं पतति। असौ अपाये ध्रुवस्यार्थे अवधिशब्दं स्वीकरोति।[47] 'अपाये यद् उदासीनं चलं वा यदि चलं वा यदि वाऽचलम्' इति कारिकाया: उद्धरणसहितम् असौ अपादानस्य स्थिरत्व चलत्व वा संम्भवति इति प्रतिपादयति। यथा- 'धावतोऽश्वात् पतति।'[48] पृथग्भूयमानस्य वस्तुद्वयस्य मिथ: सापेक्षमपादानत्वं विवक्षया तस्य निर्धारणमपि भट्टोजिदीक्षित: भर्तृहरे: सन्दर्भेण विवृणोति।[49] असौ भाष्यकारदिशा अपादानकारके केषाञ्चन पाणिनीयसत्राणाम् अनावश्यकत्वमपि विवृणोति किन्तु तन्न समर्थयति।[50]

कौण्डभट्ट: ध्रवुमपायेऽपादानमिति सत्रूव्याख्याने अपाये ध्रवुपदार्थम् अवधि वंदति। तदनुसारञ्च पञ्चमीविभक्ते: अर्थ: अवधिरेव भवति। असौ अपादाने भर्तृहरिणा 'अपाये यद्

---

[43] तत्रैव, पृ.४२

[44] भाषावृत्यर्थव्यावृत्ति:, पृ.८९-९४

[45] प्रक्रियाकौमुदी, पृ.४२५-४२९

[46] (१) आप्य इति। विशषो विभाग:........तस्मिन् साध्य इति विषयसप्तमी........यद्यपि ध्रुवशब्दो लोके एकरूपताम् आचष्टे ध्रुवमस्य रूपमिति तथाप्यपायं गतिविशषें प्रति या ध्रुवतोपयुज्यते सा इहेवोपपद्यते स च अवधिभावमेव, प्र.कौ., पृ.४२५, अपाय:, विश्लेष:, विभाग इत्यर्थ:......स चावधिभाव एव, जिनेन्द्रबुद्धि:, काशिका, पृ.५३५. (२) यद्ध्रुवम् अवधिभूतम् इति............तथा चोक्तम्; अपाये यद् उदासीनं........अपादानमुच्यते इति। पततो ध्रुव एवाश्वो..........कर्तृत्वञ्च पृथक् पृथक् प्रक्रियाकौमुदी, पृ.४२५., (३) पूर्वस्यायं प्रपञ्च: उत्तरेपि यो पूर्वस्यैव एवं तर्हि पूर्वस्यायं प्रपञ्च: ......एवम् उत्तरेऽपि योग: पूर्वस्यैव प्रपञ्च: वेदितव्य:, जिनेन्द्रबुद्धि:, काशिका, पृ.५३९

[47] ध्रुवं स्थिरम् प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रय:, प्रौढमनो. पृ.५२६

[48] सिद्धान्तकौमुदी १/४/२४ वा. सूत्रे

[49] प्रौढमनो. पृ.५२७

[50] भाष्यकारस्तु जुगुप्सादीनां..........एवम् उत्तरसूत्राण्यपि, तत्रैव, पृ.५२८

उदासीनं ध्रुवं वा यदि वा चलम्' इत्यादिकारिकोक्त मंत यथाव्त स्वीकरोति।[51] भर्तृहरि: क्रियया उत्पद्यमानस्य अपायस्य अधिकरणं ध्रुवमपादानं वा भवति। तथैव हि क्रियाया: अधिकरणमपादानं न इति।[52] अत्र क्रियाशब्दने व्यापारस्य ग्रहणं न स्त धात्वर्थस्य ग्रहणं क्रियेत इति कौण्डभट्टस्य अभिप्राय:। अनेन च 'वक्षात् वस्त्र् पतति' इत्यत्र निष्क्रियेऽपि वस्त्रे वृक्षगतक्रियया पतिते वृक्षोऽपादानं भवति।[53]

वाक्यपदीयस्य अनकरणुने कौण्डभट्ट: अपादान त्रिधां विभनक्ति। तत्र यक्तानि उदाहरणानि अपि प्रस्तौति।[54] मानसापायमप्यसौ उदाहरणै: स्पष्टयति।[55] कौण्डभट्टस्य अपादानसम्बन्धीनि मतानि हरिवल्लभ: सुष्ठतया विवृणोति।[56]

नागेशानसारुम अपादानमपादानशक्तिमत भ्वति। तदनसारु पंञ्चमीविभक्ते: बोध्य अपादानत्वशक्तिरेव। 'अपादाने पञ्चमी' सत्रस्यू अयमव अभिप्राय:। नागेश: शक्ति शक्तेराश्रयञ्च समानमेव स्वीकरोति। अत: अपादानम अपाशक्तिमान च् अभिन्नौ भवत:। पाणिनीये अपादानलक्षणे 'ध्रवुमपायेऽपादानम' इत्यत्र नागेशस्य स्वीकति: अस्ति अथ च भट्टोजिदीक्षितकौण्डभट्टाभ्यां तत्र ध्रौव्ये प्रस्ततुानि विवरणानि अपि नागेशस्य सम्मतानि।[57] भाष्यकारदिशा च मानसापाय: वास्तविक: अपायश्च द्वावपि अपादानेऽस्य स्वीकतौ।[58]

अपादाने ध्रौव्यमधिकत्य भर्तहरे: चर्चामपि नागेश: विवणोति।[59] सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन उदाहृतानां प्रयोगाणां समीक्षणने नागेश: अपादानकारंक स्पष्टयति।[60]

कायसंसर्गाद् बौद्धिकससंर्गाद्वा अपायविवक्षाया तत्र यदवधिभत ध्रवू तंद्धि अपादानत्वेन लक्षितमपादानलक्षणे। तत्र लक्ष्योऽपायः लक्षणञ्चापादनं भवति।

---

[51] अवधि: पञ्चम्यर्थ:, अपादाने पञ्चमी, तच्च अवधिभूतम् इति भाव:। उक्तञ्च वाक्यपदीये अपाये यदुदासीनं……..पृथक् पृथक् इति, वै.भू.सा. पृ.१७८-१७९

[52] एवञ्च विश्लेषहतेुक्रियानाश्रये सति विश्लेषाश्रयत्वं फलितम्, तत्रैव, पृ.१७९

[53] क्रिया च धात्वर्थो…………वृक्षाद् वस्त्रं पततीति संगच्छते, तत्रैव, पृ.१८०

[54] तत्रैव, पृ.१८४

[55] तत्रैव, पृ.१८३-१८४

[56] तत्रैव, पृ.१७८-१८४

[57] पञ्चम्या अपादानत्वम् अर्थ:…………….ध्रुवमपायेऽपादानमिति सूत्रात्।, लघुमञ्जुषा, पृ.१२८४-१२८५

[58] तत्रैव, पृ.१२८५

[59] तत्रैव, पृ.१२८७

[60] तत्रैव, पृ.१२८९-१२९८[51] अवधि: पञ्चम्यर्थ:, अपादाने पञ्चमी, तच्च अवधिभूतम् इति भाव:। उक्तञ्च वाक्यपदीये अपाये

अनयोरुभयोरपि अन्यतरस्य वा मानसिकसत्तया संत्यामपि अपादानस्य प्रयोगः दृश्यते। आचार्यः पतञ्जलिः अपायस्य अपादानस्यापि व्यापकतरम अर्थं स्वीकरोति। अथ च अपादनसंज्ञाविधायकानां केषाञ्चन पाणिनीयसूत्राणाम् आनर्थक्यं प्रतिपादयति भाष्ये। यतः प्रथमादेव अपादानलक्षणसूत्रात्[61] असौ मानसमपायमपि अपादानत्वेन उक्ते सति अग्रिमसूत्रोक्तविषयाणामपि तत्र समावेशः भवति। अपायस्य सयोंगपर्वकूवियोगरूपत्त्वात तस्य मानसिकसत्ता अपि तत्र ग्रहीतुं शक्या। यथा हि कश्चित भ्ये सकंटे वा उपस्थिते तस्य अनुभवं मनसैव करोति। तत्र च संयोगः वियोगरूपः अपायः अपि मानसः एव भवति। अत एव अपादानसंज्ञा पञ्चमी विभक्तिरपि ध्रुवमपायेऽपादानमिति सूत्रेणैव साधयितुं शक्या नात्र पृथक् सूत्रस्यावश्यकताऽस्ति। एवमेव अन्यत्रापि मानसापायस्य स्वीकारेण प्रयोगाणां सिद्धिः शक्या। यथा सांकाश्यकेभ्यः पाटलिपुत्रकाः आढ्यतराः इत्यदुाहरणे साकांश्यकाना संमद्धिमत्त्वस्य पाटलिपुत्रकगतस्य अपायस्य मानसभूतत्वेऽपि उक्तसूत्रेणैव सिद्धिः शक्या। नात्र सूत्रान्तरापेक्षाऽस्तीति पतञ्जलेः मतिः। किन्त ुमहर्षिः पाणिनिः सकुमारमतीनामध्येतणॄ[62] बोधाय बौद्धिकगौरवरूपदोषपरिहाराय च मुख्यसूत्रेण सह अन्यान्यपि सूत्राणि चकार इति मत्या पाणिनेरैव मतमादृतमुत्तर्वर्तिभिः वृत्तिकारादिभिः। तद्धि मंत साधीयः इति मतिरुदेति।

[61] पा सू १/४/२४

[62] निर्धारणे विभक्ते यो भीत्रार्थानां च यो विधिः।
उपात्तापेक्षितापायः सोऽबुधप्रतिपत्तये॥ वा. प. ३/७/१४७

“कर्मणा यमभिप्रैति स सम्प्रदानम्” इति सूत्रविचारः

जयवन्तः चौधरी

भगवान पाणिनिः अष्टाध्याय्या प्रथमाध्याये चतर्थे पादे कारके इत्यधिकत्य ध्रुवमपायेऽपादानम्[1]इत्यादिभिः सत्रैः कारकसज्ञां विंदधत अपादानादिविशषेसज्ञाः अपि व्यधासीत्। द्वितीयाध्याये तृतीये पादे अनभिहिते[2]इत्यधिकत्य कर्मणि द्वितीया इत्यादिभिः त्रिसप्तत्या सूत्रैस्सप्त विभक्तीः व्यधात्। आदावपादानादिकारकाणामभिज्ञानन्ततः कारकविभक्तीनां प्रवर्तनमित्ययं क्रमः अष्टके दृश्यते। तत्र कारकेुष सम्प्रदानकारकविधायकसूत्र प्रबन्धेऽस्मिन् विमृश्यते।

अष्टाध्याय्यां प्रथमाध्यायस्य चतुर्थपादे "कारके" इत्यधिकारे वर्तते "कर्मणयमभिप्रैति स सम्प्रदानम्[3]" इति सूत्रम्। कर्मणा यम् अभि प्र एति सः सम्प्रदानम् इति सप्तपदात्मकमिंद सूत्रम्। "कुगतिप्रादयः" इति सत्रूस्थम "उदात्तवता गतिमता च तिङा गतेः समासवचनम" इति वार्तिकमत्र प्रमाणम्। 'दवे ो देव ान् क्रतुना पर्यभषूयत'[4] 'यस्मान ऋते विजायन्ते जनासो' इत्यादीन्युदाहरणानि। अत्र तिङन्तमुदात्तवद्भवति "यद्वृत्तान्नित्यम्[5]" इति निपातप्रतिषेधत्। तत्र आचार्यः हरदत्तः - वार्तिकमत च्छन्दोमात्रविषयम्, अयमभिप्रैतीत्यत्रापि समासे सति प्रातिपदिकत्वात् विभक्त्युत्पत्तिर्माभूदित्येतदर्थम[6] इति। छन्दोवत्सत्राणि भवन्ति[7] इति मतमाश्रित्य अत्र समासोऽवश्यं भवतीति केचित्। अस्य भाषाविषयत्वे तु यत् प्रकुरुते इत्यादौ समाससंज्ञायां सोः उत्पत्तिः स्यात्। लिङ्गसर्वनामनपसुंकतामभ्यपेुत्य स्वमोर्नपसुंकात इति सूत्रेण कृते लुकि ह्रस्वो नपसुंके प्रातिपदिकस्येति ह्रस्वापत्तिः। यत प्रकर्वीरनु इत्यत्र त

---

[1] अष्टाध्यायी सूत्रपाठः – 1.4.24

[2] अष्टाध्यायी सूत्रपाठः – 2.3.1

[3] अष्टाध्यायी सूत्रपाठः – 1.4.32

[4] वै. सि. कौ. - बालमनोरमाव्याख्या - सह सुपा – 2.1.4

[5] अष्टाध्यायी सूत्रपाठः – 8.1.66

[6] काशिकाव्याख्या पदमञ्जरी – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्

[7] पातञ्जलमहाभाष्यम् – 1.1.1 वृद्धिरादैच्, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं -153

नलोपापत्तिरिति वार्तिकस्य छन्दोविषयत्वमवश्यमभ्युपेयम् ।

सूत्रे य ंस ग्रहण व्यर्थमध्याहारेणापि सर्वनामद्वयार्थस्य लाभात । न च् य स इत्युपदेशाभावे राजा विप्राय गां ददाति इत्यत्र राज्ञः सम्प्रदानंसज्ञाविधाने गोः कर्मसंज्ञा न स्यात् । गो इत्यस्यावश्यं कर्मसंज्ञा भवति । कर्तुरीप्सिततमं कर्म इति सूत्रे कर्तृपदं न कर्तृसंज्ञापरम् । अपि तु स्वतन्त्रोपलक्षकम् । राजा च दानक्रियायां स्वतन्त्रः । अतः स्वतन्त्रत्वात् ईप्सिततमस्य गोः कर्मसंज्ञा सिद्ध्यति । अपि च अभिप्रयतः कर्तुः सम्प्रदानत्ववारणाय यं स ग्रहणम् । तथाहि - अभिप्रैतीति कर्तृतिङ्वृत्त्या यः सः इत्येव लभ्यते । तथा च तदर्थसम्बन्धनैव निराकाङ्क्षतया ंय सः इत्यध्याहारो नोपपद्यते । तथा च कमर्ण ा यः अभिप्रैति स सम्प्रदानम् इति सत्रूार्थलाभात् कर्तुरेव सम्प्रदानत्वापत्तिः । कर्तसृंज्ञा त ुअकमर्क धातुस्थले सावकाशा स्यात् । उपाध्याया शिष्येण गौर्दीयते इत्यर्थे शिष्यायोपाध्यायस्य गौर्दीयते इति प्रयोग आपद्यत इति दोषः । अतः सूत्रे यं सग्रहणं कर्तव्यम् । तेन अभिप्रयुतः कुर्तः सम्प्रदानंत्व वारित भवति ।

कर्मणा यमेति गच्छति प्राप्नोति सम्बध्नातीत्यर्थः उपसर्गद्वयाभावेपि लभ्यत एवेति उपसर्गद्वयग्रहणमनर्थकम् । सन्निहितसम्प्रदानस्थले दानस्य तत्काले विप्रसन्तोषरूपहृष्टफलत्वात् तत्रैव सम्प्रदानत्व स्यात; असन्निहितसम्प्रदानस्थले विप्राय ददातीति न स्यात् उपसर्गद्वयग्रहणाभावे । सूत्रेऽभिराभिमुख्येऽस्ति । प्रशब्दश्चादिकर्मणि । कर्मणा करणभूतेन कर्ता क्रियारम्भे यमुद्दिशति सः सम्प्रदानमिति सत्रूार्थः पर्यवस्यति । स चोद्देश्यः सन्निहितेऽसन्निहिते च सर्वत्र वर्तत इति विप्राय गा ददाति, विप्राय गामदात, विप्राय गा दास्यतीत्यादिप्रयोगा अप्युपपद्यन्ते । त्यज्यमानद्रव्योद्देश्यत्वे सति स्वीकाराहर्त्वं सम्प्रदानत्वमिति लक्षणं दृश्यते सम्प्रदानस्य । स्वीकारश्चात्र यथेष्टविनियोगयोग्यतोपधायकः प्रतिग्रहः । विप्राय गां ददातीत्यत्र त्यज्यमानद्रव्योद्देश्यत्व कुर्तर्विप्रेऽस्ति । यथेष्टविनियोगयोग्यता उपाधायकप्रतिग्रहत्वं च विप्रे वर्तत इति लक्षणसमन्वयः । उद्देश्यत्वस्वीकारे च गवा विप्रस्य सम्बन्धः । उद्देश्यत्वं हि त्यागकालीनचतुर्थ्यन्तपदोच्चारणजन्यज्ञानविषयत्वम् ।

यथोक्तं कर्तुरीप्सिततमं कर्म इत्यत्र कर्तपृद स्वतन्त्रोपलक्षकम ईति । स्वातन्त्र्य च

[8] अष्टाध्यायीसूत्रपाठः – 1.4.49यदुदासीनं........पृथक् पृथक् इति, वै.भू.सा. पृ.१७८-१७९

[9] कर्मसंज्ञायां हि कर्तृग्रहणं स्वतन्त्रोपलक्षणार्थमिति तेन शिष्यस्य कर्तृ त्वाभावेऽपि गोः कर्मसंज्ञा युज्यत एव । काशिकाव्याख्या पदमञ्जरी – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्

हीयते इत्यत्र कर्मणि लकारस्सिद्धो भवति। सार्थ एंन जहाति इत्यस्मिन् वाक्ये कर्मणि प्रत्ययेऽय सार्थात् हीयते इति प्रयोगस्योपपत्तिभर्व तीत्यर्थः। सार्थो नाम मनष्युसमदायुः, समदायुश्च समुदाय्यवयवाभिन्नोऽयमिति तत्समुदायावयव इति सार्थस्य अपादानत्वेपि निरुक्तस्वातन्त्र्य सार्थस्यास्त्येवातः कर्मणि प्रत्यये सार्थात् हीयत इत्ययं प्रयोगः सूपपन्नः। अर्थात् हीयत इत्यत्र सार्थस्य धात्वर्थप्रधानव्यापाराश्रयत्वेऽपि अपादाने चाहीयरुहोरिति[10] ज्ञापकात् कर्मप्रत्ययान्ते हीधातुना योगे अपादानत्वम, सार्थेन त्यज्यतेऽयमित्यर्थः। अत्र कमस ज्ञायां कर्तृपद स्वतन्त्रोपलक्षकम्। अतः कर्मणि लकारस्य सिद्धिर्भवति।

चतुर्थी कारकविभक्तिः। कारकचतुर्थ्याः सम्प्रदानशक्तिमान अर्थः। सा च शक्तिः तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेन इच्छाविषये यस्तन्निष्ठा। विप्राय गां ददातीत्युदाहरणम्। अत्र लक्षणसमन्वयः तत्तद्धात्वर्थसम्बन्धि यत्कर्म गवादि, तन्निष्ठ यत्फल स्वत्वादि तन्निरूपकत्वेन य इच्छाविषयः गोनिष्ठस्वत्वनिरूपको भवत इति दातरिच्छाविषयः ब्राह्मणादिस्तस्य सम्प्रदानसंज्ञा।

अन्वर्थसंज्ञालाभाय सम्प्रदानमिति महती संज्ञा क्रियते। तेन सम्यक प्रदीयतेऽस्मायिति तत् सम्प्रदानमिति फलति। दानक्रियाकर्मणा कर्ता यमभिप्रैति सम्बध्नाति ईप्सति वा तत कारंक सम्प्रदानसंज्ञकं भवतीत्यर्थः। तेन अजां ग्रांम नयति, हस्तृ वक्षे निदधाति इत्यादौ सम्प्रदांनसज्ञा न भवति। स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यनुकलव्यापारः दानमित्युच्यते। किञ्चित् उद्दिश्यापुनर्ग्रहणाय स्वद्रव्यत्यागो वा दानम। यथा - "कृष्णाय पारिजात ददांति" इति। स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनं वा दानम्। अतः रजकस्य वस्त्रं ददाति इत्येव प्रयोगः नत रजकाय वस्त्रं ददातीति। यतः अत्र स्वस्वत्वनिवत्तिः नास्ति नापि परस्वत्वापादनम इति वृत्तिकृन्मतम्।

भाष्यकारः नान्वर्थसंज्ञायामाग्रहवान् इत्यतः रजकाय वस्त्रं ददातीत्यपि प्रयोगः साधरेव। दा-धात्वर्थः अत्र भाक्तः लाक्षणिकार्थप्रतिपादक इत्यर्थः। भक्तिर्लक्षणा तत प्रयोज्यः भाक्तः। तत्र प्रमाणन्तु खण्डिकोपाध्यायः (वृद्धाध्यापकः / अथर्ववेदशाखाध्यापको वा) शिष्याय चपेटा (प्रसृतकरतलं चपेटा) ददाति[11] इति वृद्धिरादैच् इति सूत्रस्थः भाष्यप्रयोगः। अत्र दुःखं फलम्।

---

[10] अष्टाध्यायी सूत्रपाठः – 5.4.45

[11] पातञ्जलमहाभाष्यम् – 1.1.1 वृद्धिरादैच्, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं - 170

ददातिरत्र सयोगविशषोनकुलव्यापारार्थकः। चपेटासयोगंजन्यदःखाश्रयः शिष्यः भवत ु इतीच्छया दुःखरूपफलाश्रयत्वेन शिष्यस्य सम्प्रदानत्वम्। रजकाय वस्त्रं ददातीत्यत्र दा-धातुः अधीनीकरणार्थकः । अधीनीकरणत्वञ्च मलनाशानुकलं स्थापनम् । तथा च वस्त्रनिष्ठमलनाशरूपफलसम्बन्धने भृतिमान् रजको भवत्वितीच्छया रजकस्य भृतिरूपफलाश्रयत्वेन सम्प्रदानत्वम्। विप्राय गां ददाति इत्यत्र विप्रस्य शेषित्वम। गोश्च शषेत्वम । शेषित्वञ्च धात्वर्थक्रियायाः यत्कर्म तद्वृत्तिमत् धात्वर्थफलं तत्सम्बन्धजन्यफलाश्रयत्वकेच्छाविशष्येत्वम् । दानकर्मगोवृत्तितादृशस्वत्वसम्बन्धजन्यसुखाश्रयो विप्रः भवत्वित्याकारिका येच्छा तादृशच्छोविशष्येत्वरूपं विप्रस्य शेषित्वं तादृशच्छोप्रकारताश्रयत्वरूपं च गवि शषेत्वमिति समन्वयोऽत्र द्रष्टव्यः।

सम्प्रदानं हि त्रिविधम् -

अनिराकरणात्कर्तुः त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्याञ्च लभते सम्प्रदानताम्[12] ॥

अनिराकर्ता, प्रेरयिता, अनुमन्ता इति सम्प्रदानस्य त्रयो भदोः सूर्याय अर्घ्यं ददातीत्याद्यम्। अत्र सूर्यः न वा अर्घ्यदान प्रार्थयते, नाप्यनमन्युते, न च निराकरोति। विप्राय गा ददातीति प्रेरयितुरुदाहरणम्। अत्र मह्य गां देहि इत्येव विप्रेण प्रार्थितः राजा तस्मै गा ददाति। विप्रे दानूात्पर्वं दानव्यापारप्रेरकत्वमस्ति। उपाध्यायाय गा ददांतीति अनमन्तरुदाहरुणम। चतर्थ्याश्च ु उद्देश्योऽर्थः।

अकर्मकस्थलेषु कर्मणोऽभावात् कर्मणाभिप्रेयमाणं सम्प्रदानमित्येतन्न सम्भवतीति 'पत्ये शेते' इत्यादिषु सम्प्रदानसञ्ज्ञा, तन्निमित्तिका चतर्थी च दर्लभा। अतस्तत्र वार्तिकमक्तम - ु ु क्रियाग्रहणम्[13] इति। क्रियाग्रहणमपि कर्तव्यम्, इहापि यथा स्यात् - श्राद्धाय निगहर्ते, युद्धाय सन्नह्यते, पत्ये शेते[14] - इति कर्मण ा यमभिप्रैति स सम्प्रदानम् इति सत्रूस्थ भाष्यम्। एवञ्च क्रियया यमभिप्रैति सोपि सम्प्रदानमिति वक्तव्यम् इति वार्तिकस्याशयः । श्राद्धविषयकनिन्दामाविष्करोति, युद्धविषयकं सन्नहनपूर्वकं निश्चयं करोति, पतिमुपसृत्य शेते

[12] वाक्यपदीयम् – 3.7.129
[13] पातञ्जलमहाभाष्यम् – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्, द्वितीयः खण्डः, पृ. सं. 256
[14] पातञ्जलमहाभाष्यम् – 1.4.32 कर्मणा यमभिप्रैति स सम्प्रदानम्, द्वितीयः खण्डः, पृ. सं. 256

इत्येवमर्थः इति तत्र कैयटः ।

कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्यय[15] इति न्यायात् सूत्रे च कमर्पद कारकपंर, न क्रियापर्म । क्रियाया अपि कर्तुरीप्सिततमं कर्मेति सूत्रेण कर्मसंज्ञा सम्भवतीति प्रदर्श्य वार्तिकं प्रत्याचख्ये भाष्यकारः । तथाहि क्रिययापि क्रिया ईप्सिततमा भवति, सन्दशर्नक्रियया प्रार्थयतिक्रियया अध्यवस्यतिक्रियया चेति तत्रत्यं वाक्यम् । तस्यायमाशयः - मायोपहितैचत्न्याभिन्नेन आत्मना साधनेन कर्ता सन्दशर्नक्रियाम् (यत्किञ्चित्फलविषयिकां सङ्कल्पनक्रियाम्) ईप्सति, अतः सन्दशर्नक्रियायाः कर्मसंज्ञा । सन्दशर्नक्रियया च प्रार्थयतिक्रिया आप्तम इुच्छति, अतः प्रार्थयतिक्रियायाः कर्मसंज्ञा । प्रार्थयतिक्रियया अध्यवस्यतिक्रियाम (कया चष्टेया फल में सिध्येत् इति सम्यक् विचिन्त्य, कञ्चिच्चष्टेविशषे फंलसाधनत्वेन विनिश्चिनोति, तामिमा निश्चिनोतिक्रियाम्) आप्तुम् इच्छति, अतः अध्यवस्यतिक्रियायाः कर्मसंज्ञा । अध्यवस्यतिक्रियया आरम्भणक्रियाम् आप्तुमिच्छति, अतः आरम्भणक्रियायाः कमर्संज्ञा । आरम्भणक्रियया शयनादिं निश्चिता क्रियामीप्सति, एवञ्छ शयनादिक्रियायाः कमसंज्ञा । तथाभूतेन कमर्णा पत्यादेरेभिप्रेयमाणता सम्भवत्येवेति यथास्थितसत्राक्षैरेव पत्ये शत इत्यादिप्रयोगा उपपद्यन्त इत्यतः क्रियाग्रहणं न कर्तव्यमिति फलति ।

इयं च साधनपरम्परा आत्मादिरारम्भावधिका सर्वक्रियाविषयिका, अतः सर्वेषामपि कर्मसंज्ञकानां क्रियारूपकर्मणाभिप्रेयमाणत्वस्य अव्यभिचारात् सम्प्रदानत्वमापद्यते इत्याशङ्का न कार्या; विप्राय गा ददातीत्यादौ, पत्ये शत इत्यादौ च सावकाशायाः सम्प्रदानसंज्ञायाः अनवकाशा कर्मसंज्ञा बाधिका भवति, अतः कंट करोति इत्यादौ इंष्ट सिध्यति । पर्यायप्रसङ्गः न शङ्क्यः, गत्यर्थकर्मणि द्वितीयाचतथ्यौ चष्टोयामनध्वनि[16] इति सत्रेूण अध्वभिन्ने गत्यर्थानां कर्मणि चष्टोयां द्वितीयाचतुर्थ्यौ विहिते इति ततोऽयत्र पर्यायः अनिष्ट इति फलति । इति शम् ।

[15] पातञ्जलमहाभाष्यम् – 1.1.23 बहुगणवतुडति सङ्ख्या, नवाह्निकरूपः प्रथमः खण्डः, पृ. सं. 303

[16] अष्टाध्यायीसूत्रपाठः – 2.3.12

वर्तमानसमाजे प्राचीनधर्मशास्त्रनिरूपितदायभागस्य प्रासङ्गिकत्वम्

ड. अञ्जनदासः

शोधसारः- वर्तमानभारतीयसमाजोऽतीव स्वार्थकेन्द्रिकः। अस्मिन स्माजे विभिन्नविषये मानवानां मध्ये हिंसा भवति मतपार्थक्यात। तदर्थं सर्वकारेण विविधविधिः प्रचलितः। तत्र दायभागविषये हिन्दूनां कृतेऽपि अर्वाचीनहिन्दुविधिः प्रतिपादितः। तत्र प्रामाणिकधर्मशास्त्रस्य समयानुसारेण परिवर्तनं परिमार्जनं कृतम्। फलतः पारिवारिकंसहतिः, परस्परयोमर्ध्ये ऐक्यभावः इत्यादयः विनष्टाः। कथं विनष्टः, ततः मक्तेरुपायः अस्मिन शोधनिबन्धे मया प्रतिपादितः सयुक्त्या। किञ्चात्र अर्वाचीनहिन्दविधिना सह धमश ास्त्रस्य पार्थक्यमपि निदिर्ष्टमिति।

कूटशब्दाः- आचारः, व्यवहारः, प्रायश्चित्तः, दायः, स्त्रीधनम्, आधुनिकविधिः

धर्मशास्त्रं हि भारतवषर्स्य प्राचीनतम प्रांमाणिक शांस्त्रम। अस्य शास्त्रस्य नामान्तर हि स्मृतिरिति। वस्तुतः शास्त्रेऽस्मिन न केवल धंर्माधर्मविषये विचारो दृश्यते। अपि त समाजे प्रचलनार्थं येषां येषामुपादानानामावश्यकता वर्तते प्रायः तेषा तेषा विंषयाणामालोचनमत्र विहितम्। तथा चा धमर्श त्रे प्राधान्येन त्रयो मख्यविषया निरूपिता महर्षिभिः- आचारः, व्यवहारः, प्रायश्चित्तञ्चेति। विज्ञानेश्वरादिभिः भाष्यकारैरपि कृत्स्नं धर्मशास्त्रं षोढा विभज्य त्रिषु अध्यायेषु हि तेषामन्तर्भावः कतृः। यथा आचाराध्याये वणध र्म-आश्रमधम-वर्णाश्रमधर्म-साधारणधर्माणामालोचना विहिता, व्यवहाराध्याये शास्त्रीयाभिषक ादिगुणयुक्तस्य राज्ञः प्रजापालनादिरूपो गुणधर्मः आलोचितः, प्रायश्चित्ताध्याये च विहिताकरणप्रतिषिद्धसेवनरूपस्य निमित्तधर्मः स्वीकतृः। अत्र च षडविध्षे स्मार्तधमर्षे गुणधर्मोऽन्यतमः। गुणधर्मे आलोचितविषयः दुष्टनिग्रहमन्तरेण न सम्भवति। दुष्टपरिज्ञानञ्च न व्यवहारदशर्नमन्तरेण सम्भवति। ननु अत्र व्यवहारशब्दस्य कोऽर्थ इति जिज्ञासायामच्यते 'वि'उपसर्गात् 'अव'उपसर्गाच्च 'हृ'धातोः 'घञ्'प्रत्यये व्यवहारशब्दो निष्पन्नः। ततश्च तस्यार्थो भवति-

"विनानार्थेऽवसन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्व्यवहार इति स्मृतः॥"[1] इति।

वस्तुतः धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैरभिभूतो यद्राज्ञे प्राड्-विवाकाय वा विज्ञापयति तदेव व्यवहारपदवाच्यं भवतीति योगीवरयाज्ञवल्क्यमतम्-

"स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्॥"[2] इति।

स च व्यवहारो भाषा-उत्तर-क्रिया-साध्यसिद्धिभदेने पादचतुष्टयात्मकः। किञ्च प्रतिज्ञा-उत्तर-संशय-हतु-परामर्श-प्रमाण-निर्णयप्रयोजनात्मको भवति व्यवहारः तस्य पदं विषयः व्यवहारपदमित्युच्यते, स च द्विविधः- शंकाभियोगः तत्त्वाभियोगश्चेति। पुनश्चायम् अष्टादशधा भिद्यते ऋणादान-निक्षेप-अस्वामिविक्रय-सम्भूयसमुत्थान-दत्तानपकर्म-वेतनादान-संविद्व्यतिक्रम-क्रयविक्रयानुशय-स्वामिपालविवाद-सीमाविवाद-वाक्पारुष्य-दण्डपारुष्य-स्तेय-साहस-स्त्रीसंग्रहण-स्त्रीपुंधर्म-दायभाग-द्युतसमाह्वयभदेनेति। तदुक्तं भगवता मुनना-

"तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव ॥।
स्त्रीपुंधर्मो विभागश्च द्युतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥"[3] इति।

अत एव दृश्यते धमशास्त्रे विचारितेषु अष्टादशव्यवहारपदषे दायभागोऽतीव विशिष्ट स्थानमलंकरोति। 'विभक्तव्यं पितद्रृव्य दायमाहुर्मनीषिणः' इति निघण्टवुचनात द्ायस्तावत पैतृकधनम् अर्थात् पैतृकधनं दाय इति पदनोच्यते। व्युत्पत्त्युनसांर दा-धातोः घञ्प्रत्यये दाय इति, ल्युट्प्रत्यये दानं चेति निष्पद्यते। दीयते इति व्युत्पत्त्या दायरूपेण पितधृन पंत्रा नैव गह्णन्ति। अर्थात् स्वर्गगामी पिता पुत्राय स्वधनं न ददाति। तत्रापि दीघरीगग्रस्तो पिता पत्रेभ्यः स्वधंन दुंात न समर्थो भवति। अत एव दीयते इति व्युत्पत्त्या दायशब्दस्य यः प्रयोगः स गौणः। प्रसङ्गेऽस्मिन जीमूतवाहनेन कथितम 'मतादृीना स्वंस्वत्वनिवत्तिपृर्वक परस्वत्त्वस्वरूपकफलसाम्यात मृतादीनां तत्र त्यागो नास्ति' इति। तथा च दाय-ददातिशब्दयोर्गौणत्वोपन्यासानर्थक्य सर्वथा अवयवराहित्ये निरूढत्वं न च यौगिकम्, तत्र मृतादीनां त्यागाभावात्। यदि त्यागो भवेत् तर्हि पितुमर्रणानन्तरं च कोऽपि धन ग्रहीतु समर्थो स्यात। अतः दायशब्दः विभाजनीये पैतकृधने रूढः।

अस्मिन् संसारे सर्वे जना एकत्र स्थातुं न समर्था भवन्ति, मतपार्थक्यादिदर्शनात्। तथाहि तत्र विभागस्यावश्यकता दरीदृश्यते। विभागशब्दस्यार्थो हि विशेषेण भजनं स्वत्त्वज्ञापनं वा विभागः। कात्यायनेनापि तदेवप्रतिपादितम्-

"सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः।
पितरो भ्रातरश्चैव विभागो धर्म उच्यते॥"[४] इति।

साधारणतया दायशब्दस्यार्थो हि यद्धनं स्वामिसम्बन्धादेव निमित्तादन्यस्य सम्भवति तदुच्यते दायपदेन। अत्रेदं वक्तव्यं यत् दायभागशब्दस्य द्विधा व्युत्पत्तिर्दृश्यते- दायस्य भागः दायभागः, अपरा च दायेन सह भागः दायभागः। यदि दायस्य भागः दायभागः इति स्यात्, तर्हि दायरूपेण संस्थितस्य दासीगवादिरूपस्य द्रव्यस्य विनाशापत्तिभवेत्। अतः दायस्य भाग इति न समीचीनम्। दायेन सह भागः दायभागः इत्यपि न समीचीनम्। यतः पैतृकधनेन सह वर्तमनेऽपि कश्चन न ममेदं धनं भ्रातुरिदमिति प्रयोगोऽवलोक्यते। अतः वक्तुं शक्यते यत दायशब्दः न यौगिकः, अपि तु रूढ एव। तदुक्तं नारदेन-

"विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः॥"[५] इति।

यद्भवतु नाम अथ अस्माकं मूलविषयो हि दायभागस्य प्रासङ्गिकता अस्मिन् समाजे। वस्तुतः प्राचीनकाले भारतीया हिन्दवः धर्मशास्त्रानुसारेण परिचलन्ति स्म। परन्तु कालक्रमेणसमाजस्य परिवर्तनानुसारं मनुष्यस्य मनसि अपि परिवर्तनं जातम्, तदर्थञ्च विधानेषु बहु परिवर्तनं कृतम्। तत्र भारतीयधार्मिकदायाधिकारव्यवस्थां वंशानुक्रमिकपरम्पराञ्च परित्यज्य पाश्चात्यपरम्परामनुसृत्य प्रवर्तन्ते। यथा 'Hindu Succession Act' इति नूतनविधिः प्रचलितः भारतसर्वकारेण। फलतः समाजे नैकानि परिवर्तनानि भूतानि, येन नैका समस्याः दृश्यन्ते। तस्याः समस्यायाः समाधनं धर्मशास्त्रनिरूपितदायभागे वर्तते स्म। इदानीं क्रमानुसारं तासां समस्यानां समाधानमालोच्यते मया-

प्रथमतः, प्राचीनकाले धर्मशास्त्रानुसारं पितुमर्रणात्परं तस्य धनं दायाधिकारसूत्रेण अधिकं धनं ज्येष्ठपुत्रः गृह्णाति स्म, यतः पित्रभावात् स एव परिवारस्य दायित्वं पिता इव मुख्यत्वेन पालयति-

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुः यथैव पितरं तथा॥"[६] इति।

परन्तु यदि ज्येष्ठपुत्रः अन्यपुत्रान् प्रवञ्चयन्ति, तर्हि परिवारमध्ये कलहो जायते। तदर्थं धर्मशास्त्रीयदायाधिकारव्यवस्था अधुना विलुप्ता जाता। अपि च 'Hindu Succession Act' इत्यनुसारं सर्वे (माता, पुत्राः कन्याश्च) मिलित्वा पितृधनं समं विभंज्य गृह्णन्ति- "The

surviving sons and daughters and the mother of the intestate shall each take one share." इति। परन्त अस्मिन न्याये दोषोऽस्ति। यतः पितुमर्रणात्परमुत्तराधिकारिरूपेण सर्वे समांशं नेष्यन्ति, तथाहि ज्येष्ठपत्रोऽपि तस्याशं नीत्वा स्वचिन्तां करोति, न तु अन्येषाम्। फलतः संसारे संहतिः अवलुप्ता भवति। यद्यपि इयमवस्था सर्वत्र न दृश्यते, तथापि अधिकतया प्राप्यते।

द्वितीयतः, धर्मशास्त्रीयविध्यनुसारं कन्या विवाहानन्तरं तस्याः पितुः सम्पत्तौ उत्तराधिकारित्वं नैव प्राप्नुवती। परन्तु वर्तमानकाले इयं व्यवस्था लुप्ता जाता। वस्तुतः अर्वाचीनहिन्दुविधौ(२००५) कन्या प्रथमश्रेणीकरिक्थिनां मध्ये अन्तर्भुक्ता जाता। फलतः क) जन्मना एव कन्या पुत्र इव स्वाधिकारेण समभागिनी भवति, ख) तस्याः यदि पुत्रोऽस्ति सोऽपि पितृधने अंशी भवति, ग) पितुरंशे तस्यापि पुत्र इव समप्रवणता भवेत इति। अतः अनेन विधिना समांशत्वेन उभयोरपि समदायित्व विद्यते, तेन पत्रकुन्ययोमर्ध्ये अभदेः परिलक्ष्यते। परन्त वास्तवे तन्न भवति। तत्र दृश्यते पितुः धनप्राप्त्यर्थं उभयोमर्ध्ये मनोमालिन्यं दृश्यते। यतः अत्र विध्यनुसारेण कन्या लाभवती भवति। सा कन्या किमपि दायित्वं न नेष्यति। यथा कश्चन पिता यदि ऋणं कृत्वा म्रियते, तर्हि तदृणं परिशोधयेत् पत्रः। तदा कन्या ऋणस्य किमपि उत्तरदायित्व न नयति। फलतः भ्रातृभगिन्योमर्ध्ये पवित्रसम्बन्धः विनष्टो भवति।

तृतीयतः, धर्मशास्त्रे सर्वैः स्मार्तैः धनान्तरापेक्षया स्त्रीधनविषये विचारः कतृः विस्तरेण। तत्र स्त्रीधनं न्यूनातिन्यूनं षड्विधमित्युक्तं भगवता मुनना-

"अध्यग्न्यध्यवाहनिकं दत्तञ्च प्रीतिकर्मणि।
भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्।।"[७] इति।

वस्तुतः आधुनिकहिन्दुमते यस्मिन् धने केवल स्त्रिया एव स्वाम्य तदवे धनं स्त्रीधनम्। तद्धनं मुख्यतः त्रिषु अवस्थासु प्राप्यते। यथा अविवाहितावस्थाया पितमातृकलाद् यल्लभ्यते, वागदतावस्थायामुपहाररूपेण यत्प्राप्यते। विवाहकाले भर्तगहृगमनावस्थायाम स्वजनाना पक्षतश्च यद्धनं प्राप्तिभर्व ति तत्सर्वं स्त्रीधनमिति। एतास त्रिष अवस्थास 'प्रीभि-काउनसिल' इत्यनेन प्राप्त स्त्रीधनमपि एकादशविध भवंति- पितदत्त, मातदंत्त, भ्रातदंत. भर्तदृत्त, भर्तृकुलाल्लब्धं, अग्न्युपागतम्, अध्यावाहनिकम्, आधिवेदनिकमन्वाधेयं, पादवन्दनादिकं, शुल्कं, पत्रुदत्तमिति। एतेष स्त्रीधनेष स्त्रियाः सम्पर्णाधिकारो विद्यते। परन्त १९५६ ख्रीष्टाब्दात्प्राक् उत्तराधिकारसत्रेण लब्धे धने तस्याः सम्पर्णाधिकारो नास्ति। वस्ततः चतुर्दशधाराबलेन अधिकारोऽयं प्राप्तः-

Property of a female Hindu to be her absolute property.—

1) Any property possessed by a female Hindu, whether acquired before or after the commencement of this Act, shall be held by her as full owner thereof and not as a limited owner. Explanation.—In this sub-section, "property" includes both movable and immovable property acquired by a female Hindu by inheritance or devise, or at a partition, or in lieu of maintenance or arrears of maintenance, or by gift from any person, whether a relative or not, before, at or after her marriage, or by her own skill or exertion, or by purchase or by prescription, or in any other manner whatsoever, and also any such property held by her as STRIDHANA immediately before the commencement of this Act.
2) Nothing contained in sub-section (1) shall apply to any property acquired by way of gift or under a will or any other instrument or under a decree or order of a civil court or under an award where the terms of the gift, will or other instrument or the decree, order or award prescribe a restricted estate in such property.
परन्तु प्राक्काले पत्यमर्ुणात्पर विधवापत्नीरूपेण जीवनधारणार्थं केवल ग्रासांच्छादन प्राप्तवतीति तु मन्मते नोचितं कर्मा यतः इयं व्यवस्था पुरुषतान्त्रिकसमाजस्य निदशर्नम्। तथाहि आधुनिकविध्यनुसारं सा विधवापत्नी पत्युधर्नस्य सम्पूर्णरूपेण दायाधिकारिणी भवति। किञ्च सा विधवापत्नी तस्या इच्छानुसांर वैवाहिकसम्बन्धः स्थापयतीत्यत्रैव ममापत्तिरस्ति। यतः यदि तस्या विधवायाः कश्चित्सन्तानः अस्ति तर्हि तस्यावस्था कीदृशी भवति तुत्त समाजे दरीदृश्यते। इदानीं कोऽपि एवं वदति यत् तर्हि किं तस्या विधवाया भविष्यत् नास्तीति आशंकायामुच्यते यस्य माता नास्ति तं निकषा जगत् तम इव। अस्मिन् विषये जगज्जननी सारदादेवीव्याह- "यस्य माता नास्ति स एव केवलं दरिद्रवान्" इति वचनानुसांर वुंक्त शक्यते सन्तानाय मातरुत्तम चिन्तन करणीयम्।
चतुर्थतः, यद्यपि पैतृकधनस्योपरि दायादानामधिकारो वर्तते, तथापि तेषु केचिदयोग्या विद्यन्ते। ते तु क्लीवादयः, ते रिक्थभाजो न भवन्ति। तुदंक्त योगीश्वरयाज्ञवल्क्येन-

"क्लीवोऽन्धपतितस्तज्जः पंगुरुन्मत्तको जडः।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्या स्युः निरंशकाः॥" इति।

अतः क्लीव-पतित-पतितोत्पन्न-पंगु-उन्मत्त-जड-अन्ध-

अचिकित्सनीयव्याधिपीडितादीनामंशभाक्त्वं नास्ति। भगवता मुननापि भणितम्-

“अनंशौ क्लीवपतितौ जात्यन्ध-बधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥”[१]

इति वचनात् वक्त शुंक्यते यद्यपि एते क्लीवादयो न भवन्ति अशभाजः तथापि ग्रासाच्छादनादिकं सर्वथा विहितम्। परन्तु अर्वाचीनहिन्दुविधौ एतेषामधिकारो वर्तते पितृधने- No person shall be disqualified from succeeding any property on the ground of any disease defect or deformity, or save as provided in this Act on any other ground whatsoever. अतः उत्तराधिकारसूत्रेण ते सम्पत्तिग्रहणे योग्या एव। फलतः पूर्वस्मिन् काले तेषां कृते परिवारे यः स्नेहः आसीत इदानीन्त स विलप्तप्रायः।

पञ्चमतः, प्राचीनदायाधिकारव्यवस्थानुसारं यदि कश्चन ब्राह्मणः ब्राह्मण-क्षत्रिय-वैश्य-शूद्रवर्णेभ्यः चतस्रः भार्या गृह्णाति, ताभ्यश्च ये पुत्रा जायन्ते तर्हि ते वर्णानुक्रमेणउत्तराधिकारिधनं प्राप्नुवन्ति। परन्तु अर्वाचीनहिन्दुविधौ ते पुत्रा इदानीं वर्णानुसारं धनं न गृह्णन्ति, ते तु समांशमर्हन्ति। फलतः यद्यपि मलवृशपरंम्परायाः लोपो भवति तथापि हिन्दुसमाजे एक्यभावप्रतिष्ठा भवेत् इति अर्वाचीनविध्युनसारम्, तत्र चत्वारः वर्णाः परस्पर समानाः।

षष्ठतः, प्राचीनधर्मशास्त्रीयविध्यनुसारं कश्चन हिन्दुपुरुषः भिन्नसम्प्रदायकन्यां वोढुं न शक्नोति, परन्तु अर्वाचीनविध्यनुसारं स कामपि सम्प्रदायकन्यां वोढुं शक्नोति, अपि च उत्तराधिकारसूत्रेण धनमपि प्राप्नोति। फलतः हिन्दुसमाजे विशृङ्खला जायते, पारिवारिकसंस्कृतिः नष्टा भवति।

सप्तमतः, प्राचीनधर्मशास्त्रीयव्यवस्थानुसारं एकस्य पुरुषस्य मरणात्परमुत्तराधिकारिरूपेण पुत्र-पौत्र-प्रपौत्रैः सह विधवापत्नी, कन्या, माता, पितामही, प्रपितामहीप्रभतयः गृह्यन्ते, तेषाञ्चाभावे सगोत्रसपिण्डादयो धनभाजो भवन्ति। एतन्मतमर्वाचीनहिन्दुविधौ परिमार्जनं कृतम्। तत्र दायादानां श्रेणीद्वयं कृतम्- प्रथमश्रेणीदायादाः(पुत्रः, कन्या, विधवापत्नी, माता, पौत्रः, पौत्री, दौहित्रः. दौहित्री, विधवापुत्रवधूः, प्रपौत्रः, प्रपौत्री, विधवापौत्रवधूः), तेषञ्चाभावे द्वितीयश्रेणीदायादाः(अ) पिता आ) पौत्र्याः पुत्रः, पौत्र्याः कन्या, भ्राता, भगिनी च इ) दौहित्रस्य पुत्रः, दौहित्रस्य कन्या, दौहित्र्याः पुत्रः, दौहित्र्याः कन्या च ई) भ्रातुपत्रः, भगिनीपत्रः, भ्रातकन्या, भगिनीकन्या च उ) पितामहः, पितामही ऊ) विमाता, भ्रातः विधवा पत्नी ऋ) पितव्यः, पितृष्वसा ळ) मातामहः, मातामही ए) मातुलः, मातृष्वसा) इति।

अष्टमतः, प्राचीनधर्मशास्त्रानुसारं अपुत्रधनस्य सम्बन्धिनामभावे तद्धनं राजा गृह्णाति, तद्वत्तु सम्प्रति सर्वकार हि गृह्णातीति शम्।

तथ्यसूत्राणि-

१) का. स्मृ.- २६ २) या. स्मृ.- २.५ ३) मनु. स्मृ.- ८.४-७
४) का.स्मृतिः- ७१.१(८३८) ५) ना. स्मृ.- १३.१ ६) मनु. स्मृ.- ९.१०५
७) तदेव- ९.१९४ ८) या. स्मृ.- २.१४० ९) प्रागेव- ९.२०१

ग्रन्थपञ्जी-

जीमूतवाहन। दायभागः। सम्पा. अ. सुब्रह्मण्य शास्त्री। दिल्ली: मतिलाल वनारसी दास पावलिशार्स् प्राइभट् लिमिटेड्, २०१५। मुद्रितम्।
दायतत्त्वविमर्शः। सम्पा. ड. यशवीर सिंह। दिल्ली: अभिषेक प्रकाशन, २००९। मुद्रितम्।
मनुः। मनुसंहिता। अनु. गिरिजाप्रसाद द्विवेदी। लखनौ: नवल किशोर विद्यालय, १९१५(प्रथमसंस्करण)।
स्मृतिनिरुपिता दायभागव्यवस्था। सम्पा. डा हिमांशुशेखर त्रिपाठी। वाराणसी: मनीष प्रकाशन्, २०१५। मुद्रितम्।
हिन्दुविधि। सम्पा. प्र. गिरिजाशंकर मिश्र। लखनौ: हिन्दी समिति, १९७०(प्रथम संस्करण)।
याज्ञवल्क्यः। याज्ञवल्क्यसंहिता। सम्पा. जास्टिस् एस्. एस्. सेट्लार। तिरुपति: राष्ट्रीय संस्कृत संस्थान्,२००७। मुद्रितम् Hindu Succession Act 1956. India. Print.

भारतीयपरम्परादिशा दाम्पत्यविच्छेदपरिहारोपायाः

चव्हाण-अविनाशः

शोधसारः -

भारतीयपरम्परायां षोडशसंस्कारेषु मुख्यतमोऽयं विवाहसंस्कारः, अनेन संस्कारेणैव दम्पत्योरविच्छिन्नः सम्बन्धः स्थाप्यत इति जगति प्रसिद्धम । विवाहसस्कारांद्गहस्थाश्रम आरभ्यते, असावाश्रम एव सर्वेषामाश्रमाणां जीवातुर्भवति अतः उच्यते ‘‘धन्यो गृहस्थाश्रमः’’ । दम्पती धमर्पूर्वकयज्ञादिं प्रति विवाहसंस्कारादेवाधिकारिणौ । विवाहात्परमुभावपि विवाहप्रयोजनं 'प्रजातन्तोरखण्डता, परस्परसाहाय्येन धर्मार्थकाममोक्षसिद्धिश्च' साधयन्तौ जीवनकालं यापयतः ।

किन्त्वद्यत्वे पवित्रेऽस्मिन् गृहस्थजीवने वधर्म ानाऽस्त्येका महती समस्या 'दाम्पत्यविच्छेदः (Divorce) इति। वैदिककाले न तथोपलभ्यते स्म समस्या इयम्, किन्तु यदा भारतीयंसविधाने दाम्पत्यविच्छेदः इति अधिनियमः स्थापितस्तदारभ्य विवाहात्परं किञ्चित्कालादेव अविच्छिन्नं बन्धं विस्मत्य क्षल्लककारणनैव विच्छेदाय प्रवत्ता भवन्ति गहस्थाः । यदि प्राणहरणादिकादिवद्बलवत्कारणमस्ति चच्छेक्यते कर्तुं दाम्पत्यविच्छेदः किन्तु सन्ति कन्याधनादिकानि क्षुल्लकान्याधुनिककारणानि येषामाधारेण विच्छेदाय प्रवत्ताः भवन्ति । अस्मिन् पत्रे मुख्यतया वर्धमानाया अस्या दाम्पत्यविच्छेदसमस्यायाः कानिचन आधुनिककारणानि तथा च धमर्श ास्त्रादिषु प्रसिद्धानि कानिचन प्राचीनकारणानि सङगृह्य दाम्पत्यविच्छेदकारणानां कथं परिहारः कर्तुं शक्यते तच्चिन्तनं क्रियते। तत्कृते पुरार्णेतिहासकाव्यादिषूपलब्धाभिः कथाभिः कविगुरुजनानामुपदेशैश्च यथाशक्यं तथा विच्छेदपरिहारोपायाः प्रदर्शिताः सन्ति ।

मुख्यशब्दाः – गृहस्थाश्रमम्, दाम्पत्यविच्छेदः, दाम्पत्यविच्छेदपरिहारोपायाः ।

भारतीयपरम्परादिशा दाम्पत्यविच्छेदपरिहारोपायाः

भारतीयपरम्परायां षोडशसंस्कारेषु विवाह इत्येको मुख्यतमः संस्कारः । तस्मात्परं गृहस्थाश्रम आरभ्यते । विद्यार्जनात्परम् *"अविलुप्त ब्रह्मचर्यः लक्षण्यां स्त्रियाम् उद्वहदे्"* इति याज्ञवल्क्यस्मृतेर्वचनम्।[1] तद्वचनमेव ानुसरन् ब्रह्मचर्याश्रम समाप्य गहस्थाश्रमप्रवेशार्थोऽय विधिः 'विवाहः, उपयमः, उद्वाहः, उपयामः, पाणिपीडनम' इत्यादिभिः षडभिर्नाम्भिः प्रसिद्धोऽस्ति।[2] *'आश्रमादाश्रम गत्वा'*[3] इति स्मृतिः धर्ममयीमिमां काञ्चिद्विशिष्टां जीवनपद्धति बोधयति । अनयैव पद्धत्या मनुष्यजीवनं रूपयति महाकविकालिदासोक्तिः – *"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। वार्धके मुनिवृत्तीना योगेनान्ते तनत्युजाम ॥"*[4] इति। वैवाहिकजीवनं गृहस्थस्य आधारः,स्त्रीपुरुषयोः गृहस्थाश्रमप्रवेशानन्तरमेव 'गृहस्थाश्रमिणौ दम्पती वा' इति सज्ञां भवति । धर्मादिसाधने पत्नी परुषस्य शरीरस्याऽर्ध भवतीत्यग्निपुराणे व्यासमहर्षीभिरुक्तम्, तद्यथा – *"जाया त्वर्ध शरीरस्य नृणां धर्मादिसाधने । नाटस्तासु व्यथां काञ्चित् प्रतिकूलं समाचरेत॥"*[5] भारतीयपरम्पराया विवाहस्य महद्दिव्य पवित्रं चास्ति प्रयोजनम्, नास्त्ययं विवाहः केवलशारीरिकसुखोपभोगाय ।

समस्या –

अद्यत्वे भारतवर्षेऽपि गृहस्थजीवने 'दम्पतिविच्छेदः' इति काचित्समस्या बाहुल्येन दरीदृश्यते । सैव आङग्भाषायाम 'Divorce' इति नाम्ना प्रसिद्धा । नियमानसार यदि दम्पतिविच्छेदः (Divorce) भवति चेत्तौ पुनरेकत्रं न वसतः, तथा चापरं विवाहमपीच्छानुसारं कर्तु शक्नुतः । एकोनविशतितमे शतके Divorce (दाम्पत्यविच्छेदः) इति कल्पना (Concept) 'Hindu Marriage Act, 1955' एतेन व्यवहारे आनीता । तदनन्तर भारते बहवः जना अनेनाऽधिनियमाधारेण दाम्पत्यविच्छेद कृतवन्तः । विच्छेदस्य कारण योग्य चद्वेरमेव किन्तु अद्यत्वे क्षल्लुककारणेनापि विच्छेदो भवति तत्त सर्वदाऽयोग्यम । अतस्तादृशानि कारणानि अन्विष्य तेषु के के निरोधोपायाः भवितुमर्हन्ति तेषां

---

[1] याज्ञवल्क्यस्मृतिः१.५२

[2] विवाहोपयमौ समौ। तथा परिणयोद्वाहोपयामाः पाणिपीडनम्॥ अमरकोषः २.७.५६

[3] मनुस्मृतिः ६.३४

[4] रघुवंशम् १.८

[5] भविष्यपुराण – १.८.३७

समीक्षणमेतस्मिन् पत्रे कृतम् ।

दाम्पत्यविच्छेदस्याधुनिककारणानि –

आधुनिककारणषेु वधुवरयोमर्त विरुद्धो विवाहः, व्यभिचारः (Adultery) परदारसेवनम्/परपुरुषसेवनम्,[6] नित्यकलहः, परस्परस्य अथवा कस्यचिदेके स्य वा शारीरिकी मानसीकपीडा च,[7] धर्मान्तरम,[8] दम्पत्योः कस्यचिद्व्र्व्यसनम (मादकपदार्थसेवनम), उभयोरन्यथाचिन्तनम् (Misunderstanding), वरदक्षिणायाचना कन्याशल्कुयाचना वा, विवाहात्परं वध्वाः गर्हादिकं पीडनं वा, ननान्दुः (Sister in law) वरमातुः (Mother in law) वा स्नषुया सह विवादः, दाम्पत्योमर्ध्ये कस्यचित्सलग्नकटंम्बे निुवसित अनिच्छुां, अनपेक्षितवेषभूषा, भार्या बलादपभुक्ताश्चेत्तस्यास्त्यागः, वन्ध्यत्वम, Virginity, शिक्षणाभावः, अहन्ता (Ego), सन्ति नैकानि एतादृशानि आधनिककारणानि[9] ।

स्मृत्यादिग्रन्थेषु दाम्पत्यविच्छेदस्यामूनि कारणानि –

स्मृत्यादिग्रन्थेषु दाम्पत्यविच्छेद इति शब्दः साक्षान्नोपलभ्यते किन्तु सन्ति कानिचन कारणानि यैः पतित्यागः पत्नीत्यागश्च भवति स्म, अपरविवाहश्च क्रियते स्म । तानि प्रदीयन्ते क्रमेण –

A. भार्यात्यागस्तथापुनर्विवाहे स्मृत्यादिप्रमाणानि – (Divorce of wife by her husband and remarriage of husband)

१.वन्ध्यत्वम् (Barrenness)/**स्त्रीप्रसः** (Producing female children only), **मृतप्रसवा** (Producing dead children) – मनुना मनस्मुतौ उच्यते कस्छित्पत्राुप्तमनुाः वन्ध्यां निष्फलां मृतप्रजां कन्याप्रसविनीं पत्नीं वा त्यक्तुमथवा तस्या उदरनिर्वाहस्य सुव्यवस्थां कृत्वा अन्यद्विवाहं कर्तुं शक्नोति - *वन्ध्याऽष्टमेऽधिवेद्याऽब्दे दशमे त मृतप्रजा । एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥*[10] आचार्यकौटिल्योऽपि तथैव वदति - *वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्या चाकाङ्क्षेत। दश बिन्दुं द्वादश कन्याप्रसविनीम ॥38॥*

---

[6] Hindu Marriage Act, 1955 Section 13 (1) (I)

[7] Hindu Marriage Act, 1955 Section 13 (1) (ia)

[8] Hindu Marriage Act, 1955 Section 13 (1) (vi)

[9] NA. (Feb 3, 2020).

[10] मनुस्मृतिः ९.८१

ततः पुत्रार्थी द्वितीयां विन्दते ॥39॥[11]

